रमणसंभवः योगेत्यनेनैकोपि बहुरूपः सन्निव पृथक् पृथक् युगपद्रमयामासेति सूचितं अन्यत्तुल्यं रमणप्रकारमेव ताभिरित्या
दिभिश्चतुर्भिर्वर्णयन् आदौ ताभिः सह प्रेमसंगमेन तस्यापि शोभाविशेषं सदृष्टांतमाह ॥ ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणो
त्फुल्लमुखीभिरच्युतः उदारहासद्विजकुंददीधितिर्व्यरोचतैणांक इवोडुभिर्वृतः समेताभिरत्यंतं नितिकं गताभिः एतेन प्रथममुक्ति
प्रत्युक्तिसमये तासां मध्ये श्रीराधा नासीत् किंतु कृष्णस्यावहित्थ्यापगमे जात एव सा मिलितेति ताभिर्वृतः परितो वेष्टितः सन्

अच्युतः कामादिभिरनिर्जितोपि तथात्वविम्बः अनिर्जितेवाच्युतास्त्विति यद्वा कथमपि कस्यापि विक्षोभाभावान्नच्युत इत्यच्युतोपिय
हारसप्रसरात् कथमपि न च्यवते इत्यपि श्रृंगाररसपूर्णतोक्ता अतएव विशेषेणारोचत अशोभत समेतत्वे हेतुः उदाराणिरस
विशेषोद्दीपनविचित्रवैदग्ध्यादिमयत्वेन सर्वोत्कृष्टानि परमसुखप्रदानि वा चेष्टितानि स्पर्शनपुष्पाद्यर्पणकटाक्षादिरूपाणि य
स्य सः यद्वा प्रहस्येति पूर्वोक्तो हेतुस्तत्र विराजत एव यद्वा प्रहस्यारीरमत् रंजयामास रतेरागात्मकत्वात् तथा च विश्वः रतिस्म
रपत्न्यां च स्यात् रागे च सुरते रतिरिति अयमेव संगतो हेतुः ततश्च उदारचेष्टित इति वक्ष्यमाणरमणोपकरणं विरोचनकारणं च
ज्ञेयं अतएव पृथक्स्पर्द्धेक्षणं स्वकर्तृकं तत्तत्कर्तृकं वा एवं शक्तिविशेषेणैश्वर्यमपि दर्शितं परितोवर्तमानास्ताः प्रीतिसाम्येन युग
पदीक्षणात् उत्फुल्लशब्देन मुखस्य कमलत्वं ईक्षणस्य च भास्करत्वं व्यंजितं एवं तासां रसविशेषप्रकाश उक्तः तस्यापि तमाह
उदारे हासे द्विजेषु च कुंदपुष्पवद्दीधितिर्यस्य सः एवं हासस्य चमत्कारता दन्तानां च शुभ्रकांतिरुक्ता यद्वा उदारहासे द्विजकुं
दानां दीधितिर्यस्य यद्वा उदारो हासो यया सा द्विजकुंददीधितिर्यस्य इति श्रीमद्दन्तानां प्रकाशेन हासस्याधिकशोभोक्ताः
स्वतः परमकाष्ठाप्राप्तनित्यशोभामयस्यापि ताभिः शोभाविशेषं दृष्टांतेन साधयति एणांक इति पूर्णचंद्रस्ताराभिः सर्व
तो विराजमानाभिः स्त्रीभिर्वृतः सन् यथा विरोचते न तु द्विदिति एवं ताभिः सह तस्यान्योन्यं शोभनत्वे प्रेष्ठत्वं नित्यसाहि
त्यं च सूचितं एवं शोभाविशेषोदयेन श्रीवृंदावनमपि शोभयन् गीतेन पुष्पादिस्पर्शनेन च भावमुद्दीपयितुं किंवार

त्रियोगपयमुनापुलिनं गंतुं गमनक्रमेणैव प्राक्रोत्साह ॥ उपगीयमान उद्गायन्वनिताशतयूथपः मालां बिभ्रद्वैजयंतीं व्य
चरन्मंडयन्वनं ॥ रूपगुणलीलादिवर्णनेन स्तूयमानः यद्वा वकृधातु गीतगानेन उपचरणेषु पार्श्वेषु गीयमानः अतो हर्षे
णोच्चैर्गीयन् वनिताः जनितात्यंतानुरागाः सीमंतिन्यः तथा च विश्वः वनिता जनितात्यर्थानुरागायां च योषितीति तिता सांश
तानि यूथानि पाति सर्वदुःखाद्रक्षति यद्वा पिबति पिबंत इव चक्षुर्भ्यामित्यादिवत् आसक्त्यासेवते यद्वा अधरामृतपान
दिना साक्षात्पिबतीति वेति तथा सः तासां निजनिजजात्यानुसारेण वर्गशो यूथत्वं तत्र श्रीनित्यप्रियाः काश्चित् काश्चित्तदंश
भूता देव्यः याउद्दिश्य पद्मश्रीब्रह्मणादिष्टं संभवंतु सुरस्त्रिय इति काश्चिच्च प्रौढसाधनैर्भावविशेषसिध्या व्रजकिशोरीत्वं प्रा
प्तास्ताद्विविधा मुनयः श्रुतयश्च दंडकारण्यवासिनो मानससरस्तीरमहातपस्विनश्चेति काश्चिच्च मुनयः काश्चिच्च महोप
निषदाद्याः श्रुतय इति तत्र वृत्तं पद्मबृहद्वामनादौ व्यक्तमेव तत्रैव भावविशेषेणावांतरभेदं प्राप्ता इत्येवं विभाग छुक्त्वा तेना
नाश्रुविसर्वासां प्रायो भावस्य जात्यात्सर्वा एवता- साम्येन रमयामासेत्यर्थः वैजयंती पंचवर्णपुष्पग्रथितां पंचवर्णा वैजयंती
ति वचनात् नवरत्नखचितामिति केचित् यद्यपि रिरंसया पूर्वं धृतान्यन्यान्यपि भूषणानि विद्यंते तथाग्रे वक्ष्यते
वलयानां नूपुराणां किंकिणीनां च योषितां सप्रियाणामित्यादि तथापि तां बिभ्रदिति राज्ञो तया शोभाविशेषाभिप्रायेण
किं वा ताभिः सद्यस्तत्रैव विरचय्य समर्पितत्वात् व्यचरत् परिबभ्राम ततः श्रीयमुनापुलिने तानीत्वा वैदग्धीविशेषप्रकटने

नर्मया मासेत्याह ॥ नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकं रेमे तत्तरलानंदकुमुदामोदवायुना ॥ नद्याः कालिंद्याः पुनः पुलिनमाग
त्यकाल्लिंद्या इति वक्ष्यमाणत्वात् तस्याश्च वनस्य च नामाग्रहणं तत्र तयोः प्रसिद्धत्वेन तयोरन्यापि सुबोधत्वात् यद्वा निर्जनत्वमात्रापेक्षया व
नत्वेन तस्य प्रवाहत्वेन च पुलिनोक्तमत्वमात्रापेक्षया नदीत्वेनैव तस्या उक्तिः गोपीभिः सह आविश्य प्रीत्या प्रविश्येत्यर्थः हिमाः
शीतला वालुका यस्मिन् तत् इति श्रमापनोदनत्वेन कोमलत्वेन च मनोरमता तस्य दर्शिता तस्या नद्यास्तरलैस्तरंगैरानंदीसु
खविहारी वा सौकमलामोदयुक्त वायुश्च तेन यद्वा तत्तरलैरानंदी रात्रौ मुद्रितानामपि कमलानां कंपनेन प्रकाशमानैः सुखका
रको वा य आमोदो यस्मिन् स वायौ तेन जुष्टं सेवितं कुमुदेति पाठः केषांचित्संमतः तरंगसंबंधेन शैत्यं आनंदीत्यनेन जुष्टमित्यनेन
वामोद्य सौरभ्यं वायुक्तमेवेति गुणत्रयमुक्तमिति सर्वथा पुलिनस्य रतियोग्यत्वं तेन भावोद्दीपनत्वं चोक्तं वाहुप्रसारपरिरं
भकरालकोरुनीवीस्तनालभननर्मनखाग्रपातैः क्ष्वेलावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन् रतिपतिं रमयांचकार वा
हुप्रसारादिभिरुत्तंभयन्निति सहजलज्जादिना स्वाच्छाद्यमानमपि प्रकाशयन् यद्वा प्रेमविशेषविलासरूपत्वेन वर्त्तमानमेवाध
नाविशेषतो वर्द्धयन्नित्यर्थः अतएव स्त्रैणेऽक्रूरतेः प्रेमलक्षणायाः पतिं पालकमिति तथा रतिपतिमिति दग्धांगस्यापि
कामस्य रतिसुखार्थं पुनर्जननेनैव सामग्र्यमभिप्रेतं इति रतौ तस्यासक्तिर्वैदग्धी च परमा दर्शिता तत्र वाहुप्रसारो दूरस्थानसमा
कर्षणार्थं प्राक् परिरंभानुकरणं वा यद्वा नासाग्रेव वाहूनां प्रसारणं यद्वा वाहुप्रसारेण परिरंभः गाढालिंगनमित्यर्थः क्ष्वेलिः
प्रस्तोभनादिरूपा अधरपानदंशनादिरूपा वा व्रजसुंदरीणामिति तासामपि तादृशमेव वैदग्ध्यं सूचितं अन्यथा तस्य तादृशी वैद

ग्धीप्रकाशनासंपत्तिः रमलंच्च निजशक्ति माधुर्यविशेषेणानन्योत्पमलम्भितं युगपदेवत्तेयं अथनौप्रेमविशेषोद्रेकेणाग्रेक्रीडा
विशेषार्थं विप्रलंभरूपरसविशेषंवक्तुमारभते एवंभगवतः कृष्णाल्लब्धमानानामहात्मनः आत्मानंमेनिरेस्त्रीणांमानिन्यो
ऽभ्यधिकंभुवि ४० उक्तवैदग्धीविशेषप्रकटप्रकारेणमहात्मनः आत्मारामादपिलब्धोमानः संमानः चित्तसमुन्नतिलक्षणं
भावविशेषो वायाभिस्ताः तत्रहेतुः भगवतइति रसविशेषानुभवार्थं निजभगवत्तामाधुर्यप्रकटनादित्यर्थः अतएवकृ
ष्णात् विचित्रमहारासार्णवात् परमेचित्ताकर्षकात् अतोमानिन्यः सत्यः भुविवर्त्तमानानांस्त्रीणांमध्येआत्मानंअभ्यधिकं
परमश्रेष्ठंतामेनिरे यद्वा भुविविहारभूमावितिसर्वासांसाम्यमेवाभिप्रेतं तथापिस्त्रीणांतासामेवगोपीनांमध्येप्रत्येक
मात्मानमभ्यधिकंमेनिरे तथारमणात् अतोमानिन्योपिवभूवुरितिपृथक्वाक्यंवा मदमानयोर्वर्द्धमाणत्वात् वस्तुत
स्तुपरमविदग्धानांतासांविदग्धवरप्रियसंतोषार्थपर्यवसानात् रसविलासस्वभावकृतंसेवाविलासरूपमेवतदूह्यं ता
सांतत्सौभगमदंवीक्ष्यमानंचकेशवः प्रशमायप्रसादायतत्रैवांतरधीयत ४१ तेननिजवैदग्धीभरेण यद्वा उक्तेनअ
हमेवानेनरमितेतितिरमणप्रकारेणाबलसौभगंसौभाग्यंतेन यद्वा तेस्वप्रीत्यर्थकमपिसौभगेनमदंवीक्ष्यतस्यप्रशमाय अ
न्यथास्वाधीनत्वाभावेननिजेष्टरासविलासासिद्धिः मानंचवीक्ष्यप्रसादयमानरूपकेलिनासंतोषात् प्रसादविशेषं
कर्तुंअंतर्द्धानंविनारासार्हप्रेमविशेषासंपत्तेरितिविवेचनीयं यद्वा मदमानयोः प्रशमायप्रशमः किमर्थंतदाह प्रसादाये

ति रासेनरंजनविशेषाय यद्वा अंतर्धानद्वारा न पारयेऽहं निरवद्येत्यादिना वक्ष्यमाणेन निजदर्शितातिशयविज्ञापनरूपाय य
द्वा तस्मात्प्रत्यसौभगं तेन मदः मत्तता हर्षो वा तथाच विश्वः मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः इति तद्रूपं मानमानसो
ल्लासविशेषं वीक्ष्य अत एव प्रकृष्टः प्रशमः सुखरासक्रीडात्मकं तस्मै प्रसादाय च अंतर्धानेपि तदपरित्यागतस्तेन विशे
षाद्यनुरंजनाभिव्यंजनाय तत्त्वाग्रे व्यक्तं भावि यद्वा प्रशमाय सुखाय च यः प्रसादस्तस्मै अन्यत्समानं एवं सर्वेषामनु
रंजनविशेषार्थमेवांतर्धानं तत्रात्मारामत्वादिनाऽसूयया चेति ज्ञेयं विदग्धवर्यासु विदग्धशिरोमणेरस्तथैव व्यव
हारौचित्यात् अत एवाग्येनाग्रे वक्ष्यते: मयापरोक्षं भजता तिरोहितमित्यादि तत्रैवेति साक्षात्कृत्वाप्यगमनात् अ
कस्मादेवादर्शनाच्च तच्च तस्याशक्यं न स्यादित्याशयेन परमेश्वरत्वमाह केशव इति॥ ॥इत्यनुवंशः॥ ॥तदंतर
धानकथनेन श्रीबादरायणेरप्यार्तिभरोदयात् कथाविच्छेदेन मध्येऽध्यायापातः श्रीशुकः शुक वाचेति श्रीभगवदं
तर्धानेन तस्यापि शोकोदयात् शुकवदव्यक्तमधुरोक्तेः एवमग्रेप्यूह्यं ॥तदेणत्वस्य: सन्नु विलपन्ति वाह॥श्रीशुक उवाच॥
अंतर्हिते भगवति सहसैव व्रजांगनाः अतप्यंस्तमचक्षाणाः करिण्य इव यूथपं १ सहसैवांतर्हिते इति अंतर्धानस्य
प्रकाराद्यतर्कणात् अतर्किते तु सहसेत्यमरः अयं तापाधिक्येपि हेतुरूह्यः व्रजस्यांगना इति तासां तदेकप्रियत्वेन विरह
तापस्यौचित्यमाधिक्यं चाभिप्रेतं यूथपं मत्तगजेंद्रं करिण्य इवेति रत्यां विदग्धो हि गजः इत्यादिवचनानुसारेण तदेका

लंवनत्वेनैवातासांतद्विच्छेदात्तापाधिको दृष्टांतः तापमेवाभिव्यंजयति गतेत्यादिनापद्याधिकाध्यायद्वयेन ॥ गत्यानुराग
स्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्रमैः आक्षिप्तचित्ताः प्रमदारमापतेस्तास्ताविचेष्टाजगृहुस्तदात्मिकाः ॥
कायकी चेष्टा सर्वोपलक्ष्यते अनुरागेणस्मितंविभ्रमेक्षितानि चतैर्मानसीतेषामनुरागकृतत्वात् मनोरमैरालापा
68 दिभिः मनोरमालापेनवाचिकी मनोरमाविभ्रमेष्वितिविधेय तत्रतत्समुचितत्वात् विहारो गोवर्द्धनोद्धरणादि
लीलावेणुवादनादिर्वा विभ्रमः शृंगारचेष्टा तथाचोक्तं चित्तवृत्त्यनवस्थानं शृंगाराद्विभ्रमोमतः इति एवं
यथोक्तरूपैश्चेष्टितैः पूर्वाचरितैराक्षिप्तचित्ताः ततश्चतदात्मिकास्तन्मय्यः सत्यः तदात्मिकाश्चबभूवुरितिपृथक्
प्रकृष्टमानाभिप्रायेण यद्वा प्रमदोहर्षः आनंदरूपश्चपिपरमात्मा सत्ति इतिभावः रमायालक्ष्म्याः पत्युरि
तिपरमवैदग्ध्यीतयाचगत्यादीनामुत्तमतापिसूचिता यद्वा रमाश्रीराधेतिपूर्ववत् इतिवक्ष्यमाणेन तत्साहि
त्यंसूचितं तास्तुताः परमानिर्वचनीयाः इतितदनुकरणस्याप्राक्तिक्त्वमुक्तं तथापिजगृहुः यद्वापूर्वोक्ताः सर्वा
विविधचेष्टाः अयंचप्रेमविलासोनागरीणांस्वाभाविक एव अतएवप्रियानुकरणंलीलेतिनाट्यशास्त्रे
लीलेत्युच्यते यद्वातास्ताविचेष्टाः कृष्णस्यतास्तालीलाः कर्त्र्यः प्रमदाः कर्मभूताजगृहुः कथंभूताः प्रमदाः
तदात्मिकाः तद्व्यापृताः तत्रतदात्मकत्वमभिव्यंजयति ॥ गतिस्मितप्रेक्षणभाषणादिषुप्रियाः प्रियस्यप्रति ६९

रूपमूर्त्तयः असावहं चैत्यबलास्तदात्मिकास्वेवेदिषुकृष्णविहारविभ्रमा २ गत्यादिषु उक्तेषु आदिशब्दाद्विहारवि
भ्रमो उक्तानुवादित्वेनपूर्वोक्ततत्तद्विशेषणान्यनोक्तानि प्रतिरूपलीलाभिरामूर्त्तय इन्द्रियांगादिसंघातमकदे
हायासांता: इत्यंतर्वहिस्तद्भावापत्तिरुक्ता तथाचोक्तंपद्मपुराणादेन तद्भावभावानुकृताशयाकृतिः अबलाः स्त्रियः
इतिस्त्रीचेष्टानुकरणमेवयुक्तमितिध्वनितं तथापि यद्वा तापभरेणाशेषबलरहिताः सत्यः नु एव अहमेवा
सावितिप्रत्येकंसर्वास्ववेदयंत: इति विरहविवशतोक्ता लीलाविष्टताया तत्रहेतुः तदात्मिकास्तन्मय्यः सत्य
इति तच्छब्देन श्रीकृष्णस्तद्भावापन्ना वा श्रीकृष्णोहमिति साक्षादनुक्तिः विरहवैवश्यात् तदात्मकत्वादेव
वातन्मयत्वं चप्रेमलीलाभरस्वभावेनैव नचभेदज्ञानादिनेत्याशयेनाह प्रियाप्रियस्येतिकृष्णस्येतिपरमाकर्षक
त्वाभिप्रायेण अन्यत्तैर्व्याख्यातं यद्वा अनुकरणमेवा वाप्यितेयंततस्वरूपविस्मृतिकेतदात्मिका इति अनुकरणसम्य
क्ताबोधिता: तामेवदर्शयाति गतीति हे अबलाः असौ तत्तद्विहारनागरोहमित्येतत्श्रीकृष्णवाक्यमितिशेषः
तत्र पूर्वं नर्मादिना कदाचित्तेनोक्तमस्तीत्यत एव तत्तेयंकुतोवाक्यंनसमापितमित्यपेक्षायामाह तदात्मिका इ
ति तन्मनस्काः यद्वा अयमनुकरणसम्यक्ताबोधनार्थं पुनरपिपूर्ववद्व्याचष्टे अत एव कृष्णविहारवद्विभ्रमः चुं
बनालिंगनादिचेष्टाविशेषो यासां यद्वा कृष्णस्येव विहारविभ्रमः विगतोहासोयस्मात्तादृशो विभ्रमोविलासोयासां

69

यद्वा कृष्णविहार इति विभ्रमो भ्रांतिर्यासां ताः नतिष्ठंतुं शक्नुवंते कृष्ण एवायं विहरति तावात्मनमनुकुर्वंतीत्यर्थः वाक्यासमापने विरहविक्ल
तैव हेतुर्विभाति यद्वा असौ तत्तत्प्रकारैः वर्हुत्राः श्रीकृष्णेन रमिताया साहमित्यर्थः तत्प्रकाशनं वैदग्ध्याविरहविक्लवतयैव वा
तादृग्ग्लानिवेदने हेतुः तस्मिन्नवाच्ये मरणे आत्मा चिंतया सांताः अत्यंतदुःखेन मुमूर्षया तद्रूपं वेदयन्तीत्यर्थः अतः कृष्ण
विहारैर्विभ्रम उन्मादो यासां तद्विलासस्मरणेन परमविक्लवा इत्यर्थः नचैवं केवलमनुकरणं लीलाविष्टता वा किंतु
विरहविक्लवाः सत्य इत्यस्ततोन्वेषयंत्यः पुरोदृश्यमानान्सर्वानेव आपृच्छन्नित्याह ॥ गायंत्य उच्चैरमुमेव संहता विचिक्युरुन्म
त्तकवद्वनाद्वनं पप्रच्छुराकाशवदंतरं वहिर्भूतेषु संतं पुरुषं वनस्पतीन् ॥४॥ उच्चैर्गानं तं प्रति दूरान्निजार्तिश्रावणार्थं किं
वा गीतप्रियस्य तस्य तेनाकर्षणार्थं किं वा आर्तिभरस्वभावादेव एवेति यद्यपि त्यागेन दुःखप्रदत्वेन च तद्गानादिकं न यु
ज्यते तथापि अमुमेवेति तदानीमपि तदेकप्रियत्वं किं वा तदेकमानशीलत्वमुक्तं संहताः अन्योन्यं मिलिताः सत्यः सर्व
त्र सम्यगन्वेषणार्थं किं वा सखेनान्योन्यमार्त्युपशमनार्थं किं वार्तिविशेषस्वभावादेव वनस्पतीन्प्रति प्रश्ने हेतुः
उन्मत्तकवदिति स्वच्छर्थ्येतथाधिक्येवाकुः तेन केशाद्यसंवरणं व्यज्यते तथान्वेषणे प्रश्ने च विचाराभावेनाभिनि
वेशोपि निरस्तः अन्यथा आवृत्तेष्वप्रश्नानुपपत्तिः वनाद्वनमिति प्रतिवने न्वेषणेनैतस्ततो वहुलपरिभ्रमणं तेना

६९

नेककालमन्वेषणेमपिस्फूर्चितं श्रीकाष्ठोयथावहिरंतर्व्याप्यास्ते तथाभूतेषुसर्वजीवेषुपुरुषंपुरुषरूपेणांतरमं
तर्बहिश्चव्याप्यसंतं यद्वाभूतेषु व्याप्तेषुकुंजादिषु अंतर्बहिश्चस्वनिकटे संतमप्युन्मादादेववृक्षादीन्पप्रच्छुः यद्वा
पुरुषं निजस्वामिनमितितादृशाप्रश्नेमार्गणेचहेतुः यद्वाअहोवनसर्वत्रसंतमपिस्वयंतयाज्ञायमानमपिविरहजप्रे
मभरेणैवज्ञातनपितापृष्टवत्यइतिस्वयमपितादृशात्त्रीहश्रीकष्ठेसादि अर्थः सएवअहोत्पत्यएप्रेमार्त्तिवैवृक्षप
माहात्म्यमितिभावः दृष्टोवः कच्चिदश्वत्थप्लक्षन्यग्रोधनोमनः नंदसूनुर्गतोहृत्वाप्रेमहासावलोकनैः ५॥ वोयुष्मा
भिः युष्मदीयोवासंबंधज्ञापनंतद्दर्शनसंभावनार्थः ततः स्नेहेनकथनार्थंच यद्वाप्रेमभरस्वभावएवायं येन
निजभावोऽन्यंस्वसदृशंलक्षीकृत्योच्यते इतिप्रत्येकंपृथक्संबोधनंवैष्णवत्वेनादरात् तत्राश्वत्थस्यविष्णुविभू
तित्वेनवैष्णवत्वंप्रसिद्धमेव वटेवटेचमांविद्धीत्यर्जुनंप्रतिभूतलवर्त्तिमुख्याक्षीमूर्त्तिप्रसंगेश्रीभगवदुक्तेन्यग्रो
धस्य तथातयोः साहचर्येणप्लक्षस्यापि श्रीविष्णुरुद्रब्रह्मणांक्रमेणतेधिष्ठानातीतिकेचित् यद्यपिविरह
विकलतयाउन्मत्तवत्तान्प्रतिप्रश्नोत्तादृशाभिप्रायोनघटते यथासौकुत्रकुत्रापिस्वामिपादैर्व्याख्यातो
स्ति सत्तानिदृत्तिपरे यंपंचाध्यायीतिष्यक्कीकरिष्यामः इतिस्वप्रतिज्ञानुसारेणैवनतुश्रीव्रजदेवीभावानुसारे

॥ अतः केवलंपुरतोदृश्यमानानू पृच्छेवप्रश्नः तथापिपूर्वापरवाक्यसंगत्यर्थंतेषांख्यारव्यानुसारेणैवकिंचिद्
ल्लिख्यते नंदसूनुरिति निजस्वामिनंप्रतितत्थेवोक्त्युपपत्तेः किंवा रसिकताद्यभिप्रायेण एवमग्रेपि ननुकि
70 मर्थमसौयुष्माभिः पृच्छ्यते इत्यपेक्षायामाहुः नोमनोहृत्वागतइति हृत्वेतिमनसोपरत्वंव्यज्यते अतोनवो
दिष्टत्वेनागतास्तंचोरंसाधून्युष्मान्पृच्छामइतिभावः कुच्चिदिति प्रश्नान्तर्हिकथंतामितिशेषः वि
रहविकलतयावाक्यसमाप्त्यसंभवात् ततश्चात्रैवयतोत्सम्यगन्वेषयामः किंवात्रभवद्भिर्दृष्टेसत्यनु
मीयतेसोत्रनिकटेस्तीतिः तथाप्यम्यस्ताः प्राणेन्निरुध्दरत्नेमेतिभावः यद्वा उन्मत्तकवदित्युक्तेरस्यंता
न्नि विवशातयाप्रत्युत्तरापेक्षाद्यसंभवात्तथेववाक्यसमाप्तिरितिचेयं एवमग्रेपि महत्तम त्वादितेऽस्मान्दक्षौ: ड्रा॰
प्रत्यवत्तयाननूनंकथयेयुरितिमत्वान्यान्पृच्छंतिकच्चित्कुरवकाशोकनागपुन्नागचंपकाः रामानुजोमानि
नीनांगतोदर्पहरस्मितः ॥६॥ कुरवः शोणोम्लानः नागोनागकेसरः किंइतःगतः यद्वा अत्रवर्त्तते पूर्वंदृष्टइतिपृष्टः
अधुनात्वितइतिदूरतोपिदर्शनंसंभवेत् तथापिनसुलभः स्यादितिनिकटागतस्यसत्तोऽत्रैवतत्पदान्यन्विष्यतैम्रु
तमन्वेषयामइतिभावः ननुमानिन्यः कथंतंपृच्छथ तत्राहमानिनीनामिति नूस्मितमात्रेणैवमानोनतिष्ठे
त् केवलमात्मनोवैदग्धीविशेषएवतेनैवास्माकंमानोजनितोनतत्रास्माकमपराधइति किंवातदानीमेवतास्मिते
रि॰ स्मि = ७०

नमानोहत्तः अतएवान्वेषयामइति किंवानादृष्टामहामोहनस्यविच्छेदेनक्षणमपिजीवितुंनशक्नुमइतिपृच्छामइतिभावः
एतेश्रीकृष्णसेवकाः अस्माकंमानंविज्ञायासूययानकिलकथयेयुरितिनिजसुखीमिवमन्यमानाः सौभाग्यविशेष
णंचसंदर्शनेसंभाव्यश्रीतुलसीपृच्छंति॥ कच्चित्तुलसिकल्याणिगोविंदचरणप्रिये सहत्वालिकुलैर्बिभ्रद्दृष्टस्तेतिप्रियो
च्युतः॥७॥ कल्याणिहेजगन्मंगलकारिणि॰ परमसौभाग्यवतीतिवा॰ तत्रहेतुः गोविंदस्यगोकुलेंद्रस्यनिजाश्रेषमाधुर्य्य
प्रकटनपरस्यभगवतश्चरणौप्रियोयस्यास्तत्संबोधनं॰ तयोः प्रियेवा॰ इतिमहालक्ष्मीतोप्यधिकसौभाग्यंसूचितं
बहुलप्रयासेनलक्ष्मीकाम्यरजसोः श्रीकृष्णचरणयोः स्वतःप्रियत्वात् अ आदिरूपकाप्रयोगस्तात्प्रियत्वे
नेर्ष्यायाअतोलिकुलैः सहवर्तमानामपित्वांविभ्रमत्र पूर्वमेववैजयंत्यंतर्गतित्वेन अधुनैतःवाचित्यमाला
दिरूपेणधारयन् अतएवत्तवातिप्रियस्तेत्वयादृष्टोस्तिकच्चित् अलिकुलैरितितस्याः सदामकरंदमयत्वं तेनचस
देवापरित्याज्यत्वं तथामत्तानांतेषांझंकारेणनित्यमुत्सवसंभवत्वंचसूचितं अतोवश्यंत्वदंतिकमागतस्त्वयादृष्टइ
तिभावः अच्युतइतिकदापित्वत्तोनविच्युतोभवतीतितदेवदृढीकृतं श्लेषेण अलिकुलैरितिवहुवल्लभामपित्वां
प्रियत्वेनबिभर्त्ति नचतदेकप्रियाऽस्मात् अतोतिक्रांताः प्रियाः। किंवाअतिक्रांतंप्रियंसर्वमपियेनतथेतीप्रिया

सूयोक्तिः सपत्न्याद्वियं तन्न कथयेत्तस्व ल्विति श्रीकृष्णसेविकां पृच्छंति ॥ मालत्यदर्शि वः कच्चिन्मल्लिके जातियूथिके प्रीतिं
वो जनयन्यातः करस्पर्शेन माधवः ॥८॥ सत्पुष्पा [illegible]णे न श्रीकृष्णस्य दासीभिस्त्वाभिः स्नेहेन प्रसेकसंवोधनं वद्गुति पूर्ववत्
71 यातः किमिति तैर्व्याख्यातं यद्यपूर्ववत्तासां दर्शनं संभावयंति प्रीति रिति यातः सन्करस्पर्शेनेति पुष्पात्पुष्पाणाम्
त्कृष्णानां श्रीहस्तद्वाराऽवचयेनेत्यर्थः अतो युष्मत्पार्श्वे तदागमनं संभवेदेवेति भावः श्रीषणे दासीवुनासु नखवत्त
तिर्न मे ल्गाभिश्वेता नखैरेव पुष्पच्छेदनात् पुष्पावचयप्रयोजनं वितर्कयेति माधवइति मधुना मधुरसेन क्रीडतीति
मधुरसक्रीडार्थमित्यर्थः ईर्ष्योक्तिरियं वस्तुतस्तु मा श्रीराधेव तस्याभूषणार्थमेव तच्च तासां तदनुसंधा
नाभावेपि देवगत्याविरुद्ध प्रकृत्या वास्तवतः सर्वपरिस्फूर्त्तेः स्वयमेव मुखान्निःसरस्वतीति श्रीकृष्णस्यतस्या
वादास्वपुत्ताः शंकया तं च न कथयेयुरित्यस्मात्ताप्तान् पृच्छंति वृत्तेति ॥ चूतप्रियालपनसासनकोविदारजंब्वर्कवि
ल्वबकुलाम्रकदंबनीपाः येन्ये परार्थभविकाय मुनोपकूलाः शंसंतु कृष्णपदवीं रहितात्मनां नः ॥९॥ चूताम्रयोः रसभे
देन ॥ कदंबनीपयोश्च वर्त्तुलादिभेदेन भेदः प्रियालः सालभेदः असनः पीतसालः उत्तमपुष्पफलरहितो
प्यर्कः शिवप्रियपुष्पत्वादत्रोक्तः अन्येपीलुकरीरमधूकनागरंगनालिकेरपूगतालकदलीलवलीवदरी
प्रभृतयः ननु पुष्पान्प्रति तत्कथने नाकिमस्मत्प्रयोजनं तत्राहुः परेति अत्र श्रीस्वामिपादमते भवका इती ७१

कारहितः पाठः भवेज्जन्मेतिव्याख्यानात् बहुव्रीहौ कः इकारयुतपाठस्तु सर्वत्र दृश्यते ततश्च भाविकं मंगलं त्र
भुदय इत्यर्थः तथाप्यर्थी: स एव तत्रापि यमुनोपकूलादिति परदुःखासहिष्णुतासूचिता श्रीसूर्यनंदिन्यास्त
स्याभ्रातुः श्रीयमस्य पापिलोकदंडाधिकारतः परदुःखासहिष्णुतया यावती लीयाः संगेन ता दृष्ट्वा त्वा
त् तदपरव्याधिका पद्मपुराणे श्रीयमनामहात्म्ये प्रसिद्धैव यद्वा तीर्थवासित्वेन सत्यमेव प्रशंसनीयं ननु वंच
नीयमिति भावः ननु स्वयमेव युष्माभिरन्विष्यागच्छता मित्याशंक्य निजार्त्तिज्ञापनेन कृपाजनयंत्यः सकातर्य
माहुः रहितात्मना विरहहतज्ञाना नामित्यर्थः यद्वा आत्मप्रियः श्रीकृष्णस्तत्कान्तानामित्यर्थः अतो मत्तप्रा
याः स्वयमन्वेष्टुं न शक्नुम इति भावः पूर्वं सर्वेषु प्रायो दृष्टं नपृष्टं एषु च गुणविशेषेण तद्दर्शनस्य निश्चयसंभाव
नया केवलं तद्वर्त्मोपदेशप्रार्थनं एवं निजार्त्तिविज्ञापनेनाधिकदुःखोदयविशात् यामूर्ध्नि पातात् किं वा पदवीप्रा
र्थनेन पदवीस्मरणोद्धूतमोदपिं निधाय तस्याः स्निग्धदूर्वांकुराद्युद्गमरूपं श्रीकृष्णपादाब्जस्पर्शजातपुलक
जातं दृष्ट्वा तस्याः परमसौभाग्यमत्वापरमार्त्त्याहुः किं ते कृतं क्षितितपोव्रतकेशवांघ्रिस्पर्शोत्सवोत्पुलकितांगम
रुहे विभासि अप्यंघ्रिसंभव उरुक्रमविक्रमाद्वा आहो वराहवपुषः परिरंभणेन ॥१०॥ केशवेतिपरमेश्वर त्वं पूर्ववत्
किं वा प्रकृष्टाः केशाः संत्यस्येति व्युत्पत्त्या परमसौंदर्यं सूचितं विशेषेण भासीति शोभाविशेषेणान्यहेतुकोत्स

वक्त्वमभिप्रेतं अद्रेः रत्वादिरूपकाप्रयोगः कोमलत्वादिगुणैर्नैरपेक्ष्येण। पिके वक्तलत्तलस्पर्शमात्रेणैव तदुत्सवविवक्षया ईदृ
72 शउत्सवः केवलमद्रिसंबंधमात्रेण न स्यात् किंतु संभोगेनैवेति पक्षांतरमाहुः आस्ते इति अल्पत्वे ... तं यद्वा तादृ
शशोभा दृष्ट्वा श्रीकृष्णपादानुस्पर्शेनैव तमुत्सवं संभाव्य तस्य सर्वोत्कृष्टतां सूचयंत्यस्तस्याः सौभाग्यमहि
कं वर्णयंति अपीति अद्रिसंभवो यमुत्सवः अपि किं त्रिविक्रमस्य लोकत्रयाक्रमार्थं प्रक्षिप्ते ...यस्य श्रीविष्णोः
पादेन सर्वाक्रमणाद् बभूव अपि तु नैव तदानीमीदृशोत्सवशोभाविशेषासंपत्तेः अहोन भवतु वा पादस्पर्श
मात्रात् तदुद्धारार्थं प्रकटितमहावराहमूर्तेर्भगवतः साक्षात्संभोगेऽपि न सिद्ध इत्याहुः आहो इति यद्वा अ
द्रिसंभवस्त्रिविक्रमपादस्पर्शात् कारणात् किं वा वराहमूर्तिपरिरंभणेन कारणेन बभूव तत्कथयेति शेषः
इति सर्वथा श्रीकृष्णस्य तत्तत्सकाशान्माहात्म्यविशेषः सूचितः अतस्त्वद्विरहं कथं सहेमहीति किंवा त्वंपर
मसुभगा वयं च तदहिताः दुर्भगाएवेति कृपया तत्पदवीं सम्यग् दर्शयेति भावः इयमपि श्रीतुलसीवत्तस्यानिस्याप्रि
यासापत्न्यात्तदिच्छानुसाराद्धा न कथयेदिति संशयेन विमृश्य एण्यः पृच्छंति अपीति ।। अप्येणपत्न्युपगतः
प्रिययेह गात्रैस्तन्वन् दृशां सखि सुनिर्वृतिमच्युतो वः ।। कांतांगसंगकुचकुंकुमरंजितायाः कुंदस्रजः कुलपते
रिह वाति गंधः ११ हे एण्यास्य पत्नीति त्वयापि प्रियस्पर्शविरहदुःखं ज्ञातमत एव अत्रतः कथ्यतामिति भावः एकत्वं विर ७२

हार्त्तिभरेणदूरेदृष्ट्वप्रसरणादेकस्माएवदृष्टेः दृष्टाभिति वदतिवचक्रुत्वमच्युतोपगमेनगौरवात् यद्वा एकत्वंजास्यपेह
तू तेनेर्ष्यायैववा गात्रैर्दृशांसुनिर्वृत्तिंपरमस्तु रवेतन्वधिति अन्यथा विशालप्रसन्ननेत्राणमसाफल्यं किंवा अन्यथेदृशाद्
ष्टसंभवइतिभावः सुभ्राद्ः सर्वान्यसुरवादपिवैशिष्ट्यविवक्षया तेनात्यंतातिकसंदर्शनमप्यभिप्रेतं अन्यथासुनिवृ
त्यसंपत्तिः हेसखीतितस्याअपिश्रीकृष्णविषयवसानुरागदृष्ट्वावनेसहविहारादिनावा अतोस्मासुदर्शनानैवकार्यमि
भावः अच्युतइतिसुनिर्वृतिविस्तारणे किंवाइहोपगमने विच्युतिर्नास्तीतिभावः तदेवाभिव्यंजयंति कांतेति तद्विजानंति
दितितुलसीमाला अधनाच्चकुंदस्रजइत्येवंमालात्रयंगम्यते यद्वा वैजयंत्या मन्यत्रापितुलसीसद्भावात्त्ह्वारणं ज्ञो
गोपीकुलस्वामिनः लज्जयावैदग्ध्यानवासाद्वात्तयानुक्तिः अतस्तदेकप्रियाणाम स्माकंतदभावेनप्राणेरक्षानस्यादिति
सर्वथाशीघ्रंकथयेतिभावः श्रवणेणकुत्सितंलातिश्रादददातियोजानस्तस्यैवपतिरिति तयासा हित्यंयुक्तमेवेतीर्ष्य
योक्तिः अन्यत्रेच्चीरव्यातं यद्वा प्रियपउपगतसंगतः सन्निहास्ते ननुतर्हिअन्विष्य दृश्यतां तत्राहुः गात्रैरिति परमध्य

पुष्पमञ्जरीदकुम्भैरिव सदृश्यन्ते न त्वस्माभिर्दृष्टुं शक्यन्ते इत्यर्थः ननु तद्दर्शनात्त्वदर्शितैर्वनेत्यादुःकांतेति ॥ अन्यत्स्माकं हरिणीनां
73 विलोकनाभिनिवेशेन निजविरहार्त्तिदृष्ट्वा तासामप्यार्त्तिभरोदयात् स्तब्धतां भत्वा ता विहाय कलपुष्पादिभारेण नतान्
वृक्षान्वीक्ष्य विनयभरत्तनम्रान् परमसाधून्मत्वा सर्वाने वतान्पृच्छति बाहुमिति ॥ बाहुं प्रियांस उपधाय गृहीतपद्मो
मानुजस्तुलसिकालिकुलैर्मदांधैः अन्वीयमान इह वस्तरवः प्रणामं किं वाभिनंदति चरन्प्रणयावलोकैः १२ बाहुं
प्रियांस उपधायेत्यादि किं पूर्वोक्तगंधप्राप्त्याप्रियया सह गमनं संभाव्य तत्र चललनास्कंधसोरम्यमिश्रितप्रितश्रीमद्बाहुसौर
भ्यं तथा श्रीहस्तामोदात्कपद्मगंधं तथा भ्रमरगंधसंवलितं तदंगतुलसीगंधं च प्राप्योक्तं किं वा नागराणमीदृशी परिपा
टीभवेदिति युक्त्यातथोक्तं तुलसिकाया अलिकुलैरिति तस्या एव सर्वतो मधुरामोदविशेषात् अत एव मदांधैः तैरन्वी
यमानत्वेन वा कुमित्यादिना वरसविशेषप्रकटनं तथा तुलस्याः सौभाग्यं तत्संबंधादलीनां च सूचितं अन्वीयमानत्वेनै
व मदांधानां तेषां महाध्वनिना निजनिकृतिलीलाभंगशंकया पुष्पद्विधव्यवधानेन तान्परिहर्तुं किं वा पुष्पपुष्पेषु सं
चारयितुं इह चरन् विशेषतस्त्वप्रणतवत्सलत्वादत्रैव चरन्नस्ति इति भावः प्रणयावलोकैः किमभिनंदति अनुमोदते स्वी
करोति वेति तेषां सुदुर्लभत्वात् किं वेति सकृदात्तपक्षे अनस्तत्कथयते ति शेषः अन्यतैर्व्यर्जितं अथवा श्वासप्राप्ते
र्वाधिकनतान्वृक्षान्वीक्ष्य तेन श्रीदक्षिणहस्ते पद्मग्रहणं संभाव्य क्वचिच्च भयादिवाग्रतोद्भुतपतितान्स्यधिकमग्ना ७३

न्याकुलानि प्रियापदानि वीक्ष्य तेन च मदांधभ्रमरानुगमनं संभाव्य किंवा तत्तत्पदोपरि भ्रमरमुखनिर्गलितमधुकणे
न्सर्वतो वीक्ष्य तथा तथोक्तमिति ज्ञेयं। यद्वा। केवलमुन्मत्ततयैव तत्तदुक्तिः नच किंचिद्दर्शनविचारादिनेति इत्युन्मत्तवच
इति वक्ष्यमाणत्वात् श्लेषेण मदांधा एव तमनुसरंतीति तथा तेषां संबंधात्सोपि मदांध एवेति ध्वनयन् परोक्षोक्तिः यद्वा मदं
धेरपि अतो गतमानाभिरस्माभिर्यद्ययमनुगम्यते तद्युक्तमेवेति भावः एते हि तज्ज्ञाः तन्मतमनुसरंतो नूनं न कथयेयु
रीमतर्हि स्त्रीत्वेनात्मीया लता एवेताः पृच्छाम इत्यन्योन्यमाहुः पृच्छतेति॥ पृच्छत इमा लता बाहूनप्याश्लिष्टा वनस्पतेः नू
नं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो ॥१३ बाहूनाश्लिष्टा इत्यादिकं सर्वं निजभावानुसारेण॥ इत्युन्मत्तवचो गोप्यः
कृष्णान्वेषणकातराः लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः १४ ● इति उक्तप्रकारेण। यद्वा॥ इति ईदृशं
॥उन्मत्तानां वच इव वचो यासां गोपीनां ता उन्मत्तवच इत्युक्तानुवादः तन्न ह्यवश्यानि केवलमुन्मत्ततयैवेति पूर्वोक्तो
न्मत्तकवदित्यस्य तात्पर्यं तत्र चोन्मत्तवचस्त्वं अयोग्येष्वपि प्रश्नात् तत्रापि तथा तथा तत्तत्प्रश्नादिति अनुच
क्रुरित्यत्र हेतुः कृष्णस्य परमाकर्षकस्य अन्वेषणाय कातराः इति अतः कातर्येणैव तत्तदनुकरणे न च स्वाच्छंद्ये
नेत्यर्थः तत्रैव हेतुः तदात्मिकाः तेन हृतचित्ताः यद्वा नच्छब्देन लीलाः परामृश्यंते तत्तत्स्वानुकरणेऽभिनिवेशेन

तत्तत्सम्पत्त्यात्मकमभिप्रेतं यद्वा॰ न तु तल्लीलास्मरणेनापि विरहार्त्तानां प्राणा दुर्द्धराः अनुकरणाद्यत्तेन च विवृद्धवह्निज्वा
लानां तासां हृदि कथमात्मादिष्टदिस्ता शं स्यात् तस्मिंश्चैवात्मायायासां ताः सुशीतलात्मस्ताः स्त्रीवंसंबंधेन न निःसृतः अ
७५ न्यथा स्वचेष्टानवः सन्दग्धो भविष्यदेवेत्यर्थः यद्वा श्रीकृष्णाविष्टचित्ता इति तत्तदनुकरणं तद्व्यसनतयैव न त्वात्मबु
द्ध्येत्यर्थः अनुकरणमेव प्रपंचयति॥ कस्याश्चिदिति नवभिः कस्याश्चित्पूतनायंत्याः कृष्णायंत्यपिवत्स्तनं तोकायंत्या
रुदंत्यन्या पदाहन् शकटायंतीं १५ तद्विवेकस्त्वेवं ज्ञेय त एव तत्र चानुचक्रुरित्युक्तेरनुकरणस्यैव प्रपंचने कार्येपि तन्म
यत्वप्रपंचनमनुकरणस्यैव सम्पल्लवबोधनार्थमिति अथवा केवलमनुकरणस्यैव प्रपंचोस्त्येयः तत्र चासौ दैहिके चे
ष्टायाः प्रायो देहचेष्टयैवानुकरणं वाक्चेष्टासंवलितायाः प्रायस्तथैव मानसचेष्टासंवलितायाश्च तथैवेत्येवं त्रि
धानुकरणं तत्र यद्यपि भावनयैव सर्वत्रानुकरणं तथापि तत्र तत्र तत्प्राधान्यापेक्षया त्रैविध्यं तत्रादौ देहचेष्टाप्रधा
नानुकरणमाह त्रिभिः पूतनायमानया पूतनाद्यनुकरणं केवलं भावनयैव किंचित्तत्तन्मुद्राद्याचरणेन न तु वे
दिना सर्वथा तदसंभवात् अत एव वक्ष्यते॰ कृष्णात्मभावना इति तदपि विरहे ववश्यपेन यद्यपि न स्युश्चेत् तथापि वि
रहार्त्तिभरस्वभावेन तत्तल्लीलाभिनिवेशात्स्वयमेव संपद्येतेति पूर्वमध्यायारंभे उक्तमेव तत्र यद्यपि कृष्णप्रिया ७४

णं तासां दैत्यानुकरणं न युज्यते तथापि केनापि सुदुरूहेन भाववैचित्री विशेषेण विष्टास्ताः कृष्णस्यैव लीला अनुचक्रुः
तासां प्रियसख्यस्तत्तद्भाव विष्टास्ता वितर्क्यन्त एव तद्वि● तासं जननेन महादुःखापनोदनार्थं बुद्धिपूर्वकमेव पूतनाद्यनुक
रणं कृतवत्य इति अथवा इति एवं ताः कृष्णान्वेषणकातरा बभूवुः अनु अनंतरं तासां प्राणरक्षार्थं तास्ताल्लीलाः कर्त्र्यः विरह
विह्वलाः सर्वा एव व्रजसुंदरीस्तदात्मिकाः लीलामयीश्चक्रुः अतस्तत्तल्लीलापरिकरत्वाद्दैत्याद्यनुकरणं नासंगतमिति सर्वमे
न वद्यं स्तनमपि वदिति चानुकरणमात्रं न तु तत्त्वतः अनुकरणस्यैवापेक्ष्यत्वात् एवमग्रेऽप्यदप्यूह्यं शकटायती शकटायमा
नां एवमग्रेऽपि शकटानुकरणं तोकायमानायाउपरि शकटवत् कथंचिदवस्थानं ज्ञेयं ॥ दैत्यायित्वा जहारान्यामेका कृष्णा
र्भभावनां रिंगयामास काप्यंघ्री कर्षंती घोषनिस्वनैः १६ घोषाः किंकिणपस्तेषां निःस्वनैः कृत्वा सहिता विति वा
। तच्च साक्षाद्देवता सामपि यादे बनूपुरसद्भावात् एतच्च घोषप्रघोषराचिरमित्याद्युक्तं रिंगणलीलानुकरणं गोपा
यं त्य इति । कृष्णरामायिते द्वे तु गोपायंत्यश्च काश्चन वत्सायितीं हंति चान्यात त्रैकानुबकायिनीं ॥१७॥ गोपबालायां
त्यः इति ज्ञेयं ॥ तत्पत्नी बालकैरेव वत्सचारणात् चकारात् अघायमानां च हंति अहन् सामीप्येवर्त्तमानाः अथना
वाकवधानानुकरणं पंचभिर्वृत्तान्याहादौ प्रलंबवधात् आतन ग्रीष्मकृत विचित्रलीलानुकरणमाह आहूयेति
द्वाभ्यां ॥ आहूय दूरगा यद्वत्कृष्णस्तमनुकुर्वती वेणुं क्वणंतीं क्रीडंतीमन्याः शंसंति साध्विति ॥१८॥ अत्र वा कृत्र

75

धान्यानुकरणात् किंवानुकरणे क्रमश्चोर्यंतावेशेन तन्मयत्वात् कृष्णायंतीत्यादिकं पूर्ववन्नोक्तं दूरगा इति तैर्व्याख्या
तमेव यद्वा दूरवर्त्तिनी व्रजादिच्छिन्ना व्रजदेवीः वेणुनादसंकेतेन यथा कृष्ण आह्वयति तथाह्वयेति एवमनुकुर्वती काचि
त्क्रीडंतीच गावादि क्रीडां कुर्वंती अन्या गोपभावमापन्ना इति ज्ञेयं कस्याश्चित्स्वभुजं न्यस्य चलंत्याह परा ननु कृष्णोहं पश्य
त गतिं ललितां [illegible] इतितन्मना ॥१९॥ कृष्णः सर्वगुणरूपादिसंपूर्णोहं अतो गतिं ममाश्रयभूतां ललिताख्यां गोप्यः पश्यत
इति एतत् तदुक्तं स्मरंत्येति शेषः तच्च तेन कदाचित् केनापि भावेन पूर्वमुक्तमस्तीति बोद्धव्यं ननु कुतोदृष्टं वा कथं नस
मापितं तत्राह तन्मनाः कृष्णहृतचित्तेति यद्वा ननु हे गोपाः गोप्यो वा पश्यत गतिं मम चेष्टां गमनं वा ललितं मनोहरं तन्म
नाः श्रीकृष्णाविष्टचित्तेत्यर्थः अनेनानुकरणस्य सम्यक्त्वं पूर्ववदेवाभिप्रेतं मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं म
या इत्युक्त्वैकेन हस्तेन यतंत्युन्निदधेंबरं २०॥ अनुकरणवशाद्वा आवेशेनैव किंवा तत्तल्लीलावश्येन साक्षाद्वाता
दिस्फुरत्त्वेनेति एवमये दावाग्निं पश्यत्स्वपि यतंतीति [illegible] सूचिता उद्यच्छंतीति वा उन्निदधे श्रीगोवर्द्धन
वदूर्ध्वं नितरां धृतवती ॥ आरुह्यैका पदाक्रम्य शिरस्याहापरां नृप दुष्टाहे गच्छ जातोहं खलानां ननु दंडधृक् २१
॥ ननु निश्चये संबोधने वा नृपेति पदं आश्चर्ये तासं बोधने दुष्टाहे रे कालिय गच्छ इतो निःसर अन्यथा दंडं करिष्ये
इत्याह जातइति ननु निश्चितं न त्वचेति चकारान्वयः कालियदमनलीलानुकरणे [illegible]र्थः ॥ तत्रैको वाच हे गोपाद

वाग्निं पप्रपतो त्वत्एं चक्षुष्या अपि दध्वंवो विधास्येहं मम मंजसा ॥२१॥ एवं तत्र कृतं चलंगी त्साघकं कोष्ठ मुंजाटव्या म पिकृतं त्वंदा
वतोर क्ष्णं द्वि विधुमेवानुकृतिमिति त्रिये यद्वा॰ तत्र तासु मध्ये च॰ तत्र मौंजाटविकतदनुकरणमेव पाठांतरस्यपक्षमेव
अंज साञ्जनापा सेनैव अधना मानसचेष्टाप्रधानानुकरणमाह॥ वद्धान्यया स्त्रजा काचित्तन्वी तत्र उलूखले भीतासुदृकृपि
धायास्यं भेजे भीति विडंबने २२॥ अन्ययाता भ्योभिन्नयापश्चादागतया दूतीरूपयाकयाचिद्दृढयातन्मतानुसारिण्या यद्वा
अन्ययास्त्रजा जगद्विलक्षणयापरममद्भुलयेत्यर्थः पूर्वमात्रापि परमकोमलगोवालादिरज्जुभिरेव बद्धत्वात् यद्वा
पूर्वस्त्रजैकया पश्चादन्ययास्त्रजा वद्धा पूर्ववद्द्रुधा वंधनार्थं तासां स्त्रजोपि वंधनसामर्थ्यं तन्मतानुसारित्वं च सं
भवेदेव तन्वी विरहार्त्यासद्य एव कार्श्यं प्राप्ता लीला प्रादुर्भावपक्षे सर्वं समंजसमेव तत्रानुकरणे तास्विति वा उलूखल इ
ति उलूखलानुकारिण्यां कस्यांचिदित्यर्थः सुदृगिति॰ दृग्भ्यामपि चकितविलोकनादिना भयमनुचकारेत्यर्थः मुखं
पिधाय हस्ताभ्यां एतच्च बालुकस्वाभाविकमपलक्षणं भीति विडंवनं कंपपुलकादि किंचिद्रोदनकाकुवाक्यादि च
एवं प्रायो भयादिना मानसचेष्टानुकरणमेव द्योतितं भयस्य मनोधर्मत्वात् एवमत्यंतभक्तवश्यतामयी श्रीदामोद
रलीला सर्वासां लीलानां मध्ये श्रेष्ठतमेति तदनुकरणं मधुरेण समापयेदिति[illegible] येनस्सर्वांते प्रोक्तं धेनुकप्रलंबयो

र्वध॰ श्रीबलदेवकृतत्वान्नानुकृतः कुमारीवस्त्राहरणं यज्ञपत्नीगणाकर्षणं च लज्जया किंवा तत्तल्लीलारसस्यात्मन्येव
पर्यवसानात्तत्तदनपेक्षया यमलार्जुनभंजनं श्रीदामोदरलीलांतर्गतत्वान् पृथग्नानुकृतमिति पूर्वोक्तलीलाक्रमाति
76 क्रमस्तु तासां विरहविरकुलतावर्णने न श्रीबादरायणेरपि तादृशभावापत्त्या तदनुसंधानापगमात् किंवा लिखितन्याये
न चेष्टादीनां तिसृणामुत्तरोत्तरस्मिन्नेकैकस्यसमवेततया केवलं च संकलितत्वयोस्तत्रापि न्यूनाधिकत्वयोः क्रमापेद
योक्तेः यद्वा विरहकातरतया तन्मनस्तया वा पौर्वापर्यानुसंधानाभावादिति एवमिति एवं कृष्णं पृच्छमाना वृंदावनलतास्त
रून् व्यचक्षत वनोद्देशे पदानि परमात्मनः २४॥ पूर्वोक्तप्रश्नप्रकारेण॥ यद्वा तत्तल्लीलानां पूर्वोक्तप्रकारकपुनःपुन
रनुकरणेन तत्रहेतुः कृष्णं चित्ताकर्षकमिति पदानि व्यचक्षत पुनर्भूमौ दृष्टिनिपाताद्विशेषेण चक्षतेति केशवां
घ्रिस्पर्शोत्सवेत्याद्युक्तौ पूर्वं केवलं संभावनयेव अधुनानु साक्षादेवापश्यन्नित्यर्थः साक्षाद्दृष्टान्यपि विरहवि
कलतयानुसंधानाभावाददृष्टानीवाभवन् अधुना च लीलाविष्टत्वेनानुकरणात् किंचिदुपशांत्या बुद्ध्युदये
नानुसंधानपूर्वकमपश्यन्नित्यर्थः अत एव विशब्दः परमात्मनः परमप्रियतमस्येति रात्रावपि तत्क्षणाण
स्तद्दर्शने हेतुः अन्यत्तैर्व्याख्यानं यद्वा प्रदोषे गते शारदपूर्णचंद्रस्य चंद्रिकासु विस्तृतासु दूरादपि स्पष्टतया तद्द
र्शनमभूत् यद्वा एवमित्यादिकमनुवादमात्रं प्रश्नमध्य एव तद्दर्शनविवक्षया तत्राह्यस्मोन्यमाह॥ पदानिव्य ७६

क्रमेत्तानि नंदसूनोर्महात्मनः लक्ष्यंते हि ध्वजांभोजवज्रांकुशयवादिभिः २५ पदाचिह्नानि व्यक्तं निश्चितं एतानि नंदसू
नोरेव भवंति नान्यस्य· हि यतः ध्वजादिभिर्विशिष्टानि विलक्ष्यंते तत्रैव हेतुमाहुः महात्मनः महापुरुषत्वादिस्पर्धः आदि
शब्दाच्चक्रशंखवाद्यः अत्र विशेषः श्रीविष्णुपुराणे ॥ त्रिलोकैकभुवं प्राह गोपी गोपवरांगना पुलकांचितसर्वांगी वि
कासिनयनोत्पला ध्वजवज्रांकुशाब्जांकरेखावंत्यालि पश्यत पदान्येतानि कृष्णस्य लीलालंकृतगामिनः इति ध्वजा
दीनां धारणप्रयोजनमुक्तं ॥ स्कंदे दक्षिणस्य पदांगुष्ठे मूले चक्रं बिभर्त्यजः तत्र जन्मजनस्यारिषड्वर्गच्छेदनाय
सः मध्यमांगुलिमूले तु धत्ते कमलमच्युतः ध्यातृचित्तद्विरेफाणां लोभनायातिशोभनं पद्मस्याधो ध्वजं धत्ते स
र्वानर्थजयध्वजं कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदकं पार्ष्णिमध्येंकुशं भक्तचित्तेभवशकारिणं भोगसंपन्मयं ध
त्ते यवमंगुष्ठपर्वणि तथा वामपदांगुष्ठमूलतस्तून्मुरवं दरं सर्वविद्याप्रकाशाय दधाति भगवानसौ पद्माद्यन्य
पि चिह्नानि तत्र दक्षिणपादवदिति ॥ तैस्तैः पदैस्तत्पदवीमन्विच्छंत्यो ग्रतोबलाः वध्वाः पदैः सुपृक्तानि विलोक्यार्त्ताः स
मब्रुवन् २६ तैस्तैर्ध्वजादिलक्षितैः वीप्सा वा कुत्सस्य कौवत्सस्य वा विवक्षया अबलाविरहान्वेषणेभावलहीना अ
पितस्य कृष्णस्य पदवीं वर्त्म अग्रतो न्विष्यंत्यः ध्रिगयस्थाणः वध्वाः कस्याश्चिद्व्रजदेव्याः यद्वा स्वभावत एव लज्जाशी

लत्वात् स्नुषावत्सर्वतः संकुचितत्वेन । किं वा श्री व्रजेश्वर्य्या मनोरथविशेषेण वधूरिति तन्मुखोच्चारणा गोकुलेव [illegible]
याः श्रीराधा एव तन्नामाग्रहणकारणे लिङ्कितमेव वधूपदलाञ्छनमुक्तं श्रीविष्णुपुराणे कापि तेन समं याता कृतपुण्या
77 मदालसा पदानि तस्याश्चैतानि घनान्यल्पतनूनि च सुस्पष्टानि मिलितानि पदानि किं सन्यस्त प्रकोष्ठत्वात् एवमा
त्मारामत्वादिना तासां मानतोऽसूयया वां तर्हि त इति निरस्तं तासामेकस्यानयनात् तच्च तत्रैव ताभिः सहास्थितया तया
केनापि संकेतेन ततो निःसारितया तदर्थं दूरे दूरे प्रादुर्भूतस्याग्रे कियत्पदप्रयाणानन्तरं मिलनादितूलं आर्त्तीः स्वपरि
त्यागेन तदेकपरिग्रहात् यद्वा विरहेणार्त्ता अपि सम्यग्विचारादिपूर्वकमब्रुवन् अन्योन्यमूचुः किं तदाह ॥ कस्याः प
दानि चैतानि यातायानंदसूनुना अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा ॥२७॥ कस्या इत्यादिना ब्रुवन्नित्यं तेन
नंदसूनुना सह याताया एतानि कस्याः पदानि परिचीयन्तामिति शेषः श्रीभगवता स्वके अंसे तत्प्रकोष्ठस्य न्यसनं च रस
विशेषेण किं वा राज्ञो स्खलंत्यास्तस्याः सुखगमनार्थं बलाद्दूरे नयनार्थं वा अनेन तस्यामधिकप्रीतिः सूचिता तामे
व दृष्टान्तेनाह करेणोः करिणेति तयोरपि काममदेन प्रीत्या तथैव गमनात् पश्चाच्च श्रीराधादेव्यास्तानि पदानि परिचि ७
त्याश्रुस्तास्तन्नाम निरुक्तिद्वारा तस्या भाग्यं सहर्षमाहुः ॥ अनयाराधितो नूनं भगवान्हरिरीश्वरः यन्नो विहाय गोविं

दः प्रीतोयामनयद्रहः २८ नूनं विमर्द्धं निम्भ्रयेवाहरिः सर्वदुःखहर्त्ता भगवान्स्त्रीनारायणः ईश्वरः भक्तेष्टदानसमर्थः
स्वतंत्रोपिवा अनयैववराधितः आराध्यवशीकृतः नच अस्माभिः अन्यथाऽस्माकमेतद्विरहार्त्त्यौघसंभवः राधयति
आराधयतीति श्रीराधेतिनाम कारणं च दर्शितं यत्स्यस्मात्कोविंदः गोकुलेंद्रत्वेन तस्या अस्माकं च तुल्योप्यसौ
नोऽस्मान्विशेषेण हित्वा दूरतो निभृतवनांतस्त्यक्त्वा तत्रापि रहः अस्मदगम्ये एकांतस्थाने यामनयत् यद्वा गो
विंद एवासौ अनया राधितः तस्याः परमभाग्यबोधनार्थं गोविंदमेव विशिनष्टीति भगवान्निजाशेषमाधुर्य
मैश्वर्यप्रकटनपरः अतो हरिः सर्वार्त्तिहर्त्ता किंवा रूपगुणादिना सर्वमनोहरः ईश्वरः व्रजजनप्राणनाथः
अनस्तदनुभवस्तयैव धृत इति भावः अन्यत्समानं यच्छब्दद्वयं हेतोस्तस्यैव दार्ढ्यं किंवा यन्नः प्रीतः तस्मा
यामनयदितिवा वरद्वयकल्पनया योज्यं एवमग्रेप्युह्यं यद्वाऽयन्नः रहो गच्छन् धन्या अहो अमी आल्यो गोविंद
ङ्घ्र्यब्जरेणवः यान्ब्रह्मेशो रमादेवी दधुर्मूर्ध्न्यघनुत्तये ॥२९॥ अमी इमे आल्य इति संबोधनं तत्र सर्वासामेकम
त्वार्थं भक्तिविशेषजननार्थं वा धारणे सर्वेषां प्राधान्यविवक्षया चशब्दाप्रयोगे पि तेषां यथोत्तरं श्रैष्ठ्यं स्फुटं
कुलस्य पश्चात्पादाङ्गुरेणाङ्कितं तो ब्रह्मेशादयः सदैव ताभिर्दृश्यन्ते अतो दृष्टमेव वर्ण्यते नत्वैश्वर्यातिशिश्रा

येणदेवीतिश्रीवृषभानुगोपनंदिनीव्याख्यातं यद्वा तद्वेणुधारणेन लक्ष्मां भक्तसुदयेनोक्तं देवीपूज्येति मूर्द्धेति
भक्तिभरं द्योतयंति अयं अपराधोविरहादिदुःखं वा अतस्तेन्द्धाए वअस्माकं चभक्तत्वात द धारणादघं सुक्तमेवे
तिभावः अन्यत्रैर्व्याख्याते यद्वारेणवएवधन्याउत्तमाः श्रीकृष्णरूपपरमधनदानयोग्या वा यद्वा अमीगोवांग
णपतिताः पूर्वदृष्टा वा अस्याः पदेरसंपृक्तास्तएवधन्याः एषामात्स्योक्तिः यद्वा इमेरेणवः आत्मश्रेमाधन्याः गो
विंदनीतत्वाङ्घोर वेणवकृतं एवं दृष्टांतत्वे नरेणनाम्निवतस्या अपिधन्यत्वमभिप्रेतं श्रीचंद्रावल्याः सखीनां
मुक्तिस्तस्याइति तस्मा अमूनिनः क्षोभंकुर्वंत्युच्चैः पदानियन् येकापहृत्यगोपीनांरहो भुंक्तेऽच्युतधरं २०.३ उच्चैः
अधिकंक्षोभं वैकल्यं पूर्वोक्तेधैर्यहानिंवा यद्वा उच्चैर्गिवउच्चभरागेण अस्मन्मूर्द्धेपर्यर्पितानिवेत्यर्थः अपह
त्येति एकाकित्वेनरहसिभोगात् यद्वाचौर्येणतयानीतत्वादेवसौऽस्मान्विहायाज्ञागतः अन्यथा कथमा
गच्छदितिभावः गोपीनां समान्यतः सर्वासामेव धनामितिपाठः तेषांसंमतः सर्वस्वमितिव्याख्यानात् अ
न्यथागोपीनां भोगपामित्येवव्याख्यातंस्यात् अच्युतस्यतं सकाम्यत्रकृष्णगच्छतोधरमिति यद्वा तस्मादच्युता
अविच्छिन्नासतीतिचिरंभोगोभिप्रेतः श्लेषेणच्युतोऽस्मन्मुखाकलितोयोधरस्तमिति निजोच्छिष्टभोगास्त
स्यासूचितः नलदंतेयदास्यवृतस्यानूनंतृणांकुरैः स्विद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीप्रियः २१ उन्नियस्कं ७८

धमारोपितवानिति स्कंधस्याकृष्टत्वाभिनिवद्धमालाऽनुसारे एतैर्व्याख्यातं प्रेयसीं प्रियतमां प्रियदूतिपैशुन्योक्तिः
अस्य पद्यस्य च अन्योन्यं प्रियत्वेन तत्रापि प्रेयसीत्वेन सर्वाभ्यस्तस्यां प्रीतिरधिका सूचिता अत उन्नयनं युक्तमेवेति
भावः यद्वा उन्निन्ये इति हस्ताभ्यामुच्छ्राप्यांके कृत्वा यतिन्ये इति ज्ञेयं तथा सत्येव तादृशालिंगनादिरसासं
पत्त्या प्रेयसीत्वं सुसिद्धमिति तल्लक्षणमाहुः इमानीति हेगोप्यद्भूति विदग्धाभिर्युक्ताभिरे तल्लक्ष्यत इति भा
वः कामिन इति अन्यथा तदसंभवः ईर्ष्योक्तिरेषा वस्तुतस्तु कामयुक्तत्वेनैवाधिकास्तोषं तदपेक्षा सूचिता अस्य पद्यस्य च
तस्यामासक्तिरभिप्रेता एतत्पद्यं बहुपुस्तकेषु न दृश्यते पश्चादयेतस्याः पदानि वीक्ष्याहुः अत्रैस्तस्तूनावचयः
प्रियार्थे प्रेयसा कृतः प्रपदाक्रमणे एते पद्यपताश्च केचपदे ३२ महात्मनाविदग्धशिरोमणिनेत्यर्थः श्लेषेण महान्
पूर्ववत् स्थूल आत्मा बुद्धिर्यस्येतीर्ष्योक्तिः इदं पद्यं क्वचिदेव दृश्यते प्रियार्थे प्रेयसेत्यत्र न पूर्वोक्तस्य प्रेयसी प्रिय
इत्यस्य वैपरीत्येनोक्त्याऽन्योन्यं तुल्य एव प्रेमा सूचितः यद्वा उन्नयनापेक्षया पूर्वं प्रेयसीमित्युक्तं इदानीं च प्रेयसे
ति प्रियतमत्वेन तया कृते नादेशेन पुष्पावचयः कृत इत्याद्यभिप्रेतं तत्र पदे इति द्वित्वे श्रीवृंदावनवर्त्तिपुष्पवृक्षाणामे
कस्यैकदेशस्थितमपि बहुकुसुमपुष्पावचयसिद्धेः किंवा स्थाने स्थाने बहूनामप्युदितानां पदानामेकत्र रूपो ऽयं यो

ईष्टे: अत एव श्रीविष्णुपुराणे पुष्पावचयमत्तोच्चैश्चक्रे दामोदरो ध्रुवं येनाग्राक्रांतिमात्राणि पादान्यत्र महात्मनः इति
॥ केशप्रसाधनं तत्र कामिन्याः कामिना कृतं तानि चूडयता कांतामुपविश्य मिह ध्रुवं ३३ केशानां प्रसाधनं संस्करणं
79 तच्च स्वांगुलिभिः तदर्थात्मशिरोन्यस्तकंकतिकया वा तु शब्दो भिन्नोपक्रमे हीति पाठे निश्चितं प्रसाधनप्रयोजनं
सूचयंति कामिन्याः कामिनेति कामक्रीडासुखार्थमित्यर्थः किंवा पूर्वोक्तिकामिन इतिवत् ध्रुवं निश्चितमि
ति साक्षात्तल्लक्षणाभिप्रायेण ॥ रेमे तया चात्मरत आत्मारामो प्यखंडितः कामिनां दर्शयन् दैन्यं स्त्रीणां चैव दुरात्म
तां ३४ स्वस्मिन् आत्मनि आत्मना स्वयमेव यद्वा आत्मना स्वभावेनैव रतस्तुष्टः चेति पाठे रेमे चेत्युक्तसमुच्च
ये चकारः तत आत्मन्येव रतस्तुष्टस्तादृशोपि रेमे इति तादृशाचमधनानास्थितामिति पूर्ववदर्थः पुनः पुनस्त
थोक्तिस्तदार्ढ्याय अतस्तयैव तुष्टः तयैवारमतीति तद्विभ्रमैर्वशीकृतश्चेति तात्पर्यं अतः प्रेमनिर्जितत्वेन तस्यां स्वसर्व
स्वमर्पितमिति सूचितं तच्च भक्तवत्सलवरस्य प्रियजनप्रेमपरवशस्य तस्य नदोषः कश्चित् प्रस्तुतनिजभा
वतासारप्रकटनरूपमहागुण एवेति पूर्वं बहुशो लिखितं श्रीभागवतामृते च विवृतमेव यद्वा स्वात्मनः स्वरवे
नात्मतुल्याः किंवा स्वस्यात्मनः प्रियाः व्रजसुंदर्यस्तासु रतोस्मि अखंडितः संपूर्णः सन्कायमनोवचनासन्न्यासा ७६

कल्पेनरेमेदूत्यर्थः अन्यत्समानं नचैवंकेवलंनिजप्रियाएवानंदिताः अन्येषामपिहितंकृतमित्याह कामिनीनामिति काम
वश्यैः स्त्रीवश्यैश्चजनैर्भाव्यमितिलोकान्शिक्षयामासेत्यर्थः तत्रयथाश्रीभगवान्निजाचरितेनपुंसः शिक्षयतितथास्वप्रि
याचरितेनच स्त्रीःशिक्षयन् तद्द्वारेणतासांदुरात्मतांदर्शयामासेत्यर्थः तदेवाहसाचेति यद्यपितादृशोव्यवहारोमानस्य
नदुरात्मतया किंतुकेवलमुभयोर्महानागरयोरन्योन्यंप्रेमविवर्द्धनोविशेषतश्चस्वाधीनभर्तृकत्वेनोचितएव
तथापिदर्पस्तत्कृतोऽतिविशेषश्चस्वरेश्वरेऽनुचितएवेति विशेषौपासनाशास्त्रपरैस्तथाव्याख्यायते तद्दोषोपि
परिहृतएव तयोर्लोकशिक्षापरत्वात् यद्वाकामिनामिंद्रादीनांदैन्यं ईदृशप्रेयसीकृततादृग्विलासादिसुख
भावात् स्त्रीणांदुरात्मतां दुष्ट विषयकामतांदुर्बुद्धितांवा श्रीकृष्णेतरकृतस्तितपतिभजनात् अथवाकामिनः
प्रतिदैन्यं स्त्रियश्चप्रतिदुरात्मतामेवदर्शयन्शिक्षयन्नित्यर्थः अयंभावः यदिकामक्रीडायांरसिकतास्तितदा
पिरंसुभिः पुंभिरीदृश्यास्त्रीवश्यतयापदीनैरेवभाव्यं स्त्रीभिश्चकंदर्पक्रीडादिषुलज्जादिकंपरिहृत्यपुरुषंचवशीकृत्य
स्वातंत्र्यरूपदुश्चरित्रापराभिर्भाव्यमिति एतच्चतयोर्द्वयमाएवचनव्यवहारादेः किंवाउक्तव्यवहारस्याभिप्रायेण यद्वा
अत्रोक्तरमणप्रकारएवायंदर्शितः ततश्चवैदग्धीविशेषेणकामशास्त्रोक्ताविविधबंधादौस्कंधद्वयोपरिस्त्री

पादद्वयधारणाद्विग्रादैन्यं पौरात्म्यंचाधरंदंशनमरवक्षतकेशग्रहणपुरुषायितादिनोक्तं दैन्यद्रात्मनाशब्दस्यप्रयोगश्च
ज्ञानादिनिष्ठमुनिविशेषापेक्षया वस्तुतस्तुनिजरसविशेषेणउक्तिभंग्यैवेति यद्वा आत्मरतइतिसप्तम्यंतंतेनस
80 हानयोरन्वयः ततश्चभावेक्तः आत्मरतौदैन्यंदुःखमेवेति कामिनः प्रतिदर्शयन् तयाकामभोगसिद्धिः आत्म
रतौदैरात्म्यमेवेतिस्त्रियश्चप्रतिदर्शयन् तयास्वापातिसेवाद्यसिद्धिः अतएवात्मारामेणानानाद्वरेणतथासह
स्वयंरेमइत्येवमादिक् अलमितिविस्तरेण एवंतद्वचनंश्रीव्रजदेवीनामपिसंगच्छेत श्रीभगवत्तत्त्वज्ञानेपिनिज
भावाव्यभिचारेणरसविशेषमयत्वात् साचमेनेतदात्मानंवरिष्ठंसर्वयोषितां हित्वागोपीःकामयानाममसौभज
तेप्रियः इद् तदात्मेनइतिपूर्वंतासुमध्येवर्त्तमानायच्छ्रपितस्यास्तादृशोमानोनासीदिदानीमेवजातइतिकेचि
द्व्याचक्षते वस्तुतस्तुतदाननादशारतौसत्यामित्यर्थः यद्वा तेनतथातेनरमितंआत्मानं सर्वासांयोषितांव्रजसुं
दरीणांमानेहेतुः गोपीः सर्वाएवतत्रापिकामयानाकामयमानाद्वित्वा असौअनिर्वचनीयदिव्यमाहात्म्य
ःपरमस्वतंत्रोऽतिदुर्लभइत्यर्थः तत्रापिप्रियः मदेकप्रेमकर्त्तासन् यद्वासर्वासामेवप्रियोपिमामेवभजते
प्रेम्णानुवर्त्तते अयंचस्वाधीनभर्तृकायाविदग्धवर्यायामानस्तद्रसपरिपोषकोयुक्तएवेति तदनुरूपत ८०

१८

१५

नूप्रसादस्त्वाग्रे भविष्यत्येव ततो गत्वा वनोद्देशं दृष्ट्वा केशवमब्रवीत् नपारयेऽहं चलितुं नय मां यत्र ते मनः ३७ ततः मानानंतरं तस्मा
द्गमनात् रतिस्थानाद्वा दृष्ट्वा गर्विता सती वनोद्देशं वनप्रदेशं तेनैव सहगमनक्रमेण प्राप्तो गत्वा यद्वा मदनुगोप्यमवश्यं भ
वितेति दृष्टत्वात् स्वयमेव गत्वा तत्र केशवं परमेश्वरमपि किं वा केशिमथना व्रजहिताचरणपरमिति यद्वा केशवे शिष्टेनाय
रमसुंदरं इति तदीयसौंदर्यमोहितेति भावः अत एवाब्रवीत् किं तदाह नपारये रत्यापरिश्रांतत्वादिति भावः लज्जया साक्षा
त्तथानुक्तिः किं वा सौभाग्यगर्वादेव तत्त्योक्तिः ननु मुग्धे तावद्दूरमग्रे स्थानांतरं कुंजं गंतव्यमिति चेत्तत्राह नयेति पूर्व
वदंकादौ निधाय त्वमेव नयेत्यर्थः एवमुक्तः प्रियामाह स्कंधमारुह्यतामिति ततस्त्वांतर्दधे कृष्णः सा वधूरन्वतप्यत ३८
स्कंधं मदंसं आरुह्यतामित्याह इदं च नर्मणैव प्रियामित्युक्ते यद्वा कायः मदीयं वक्षः कटीरं वा तथा च विश्वः स्कं
धः प्रकांडे काये च बाहुमूलसमूहयोरिति ।। ततः पश्चात् किं वा तस्मात्स्थानात् तस्याः सकाशाद्वांतर्दधे चकारः भिन्नो
पक्रमे अंतर्दधे चेति समुच्चये वा अंतर्धानप्रयोजनं पूर्वमेवोक्तं तदेव सूचयति कृष्णः परमानंदघनमूर्तिरिति
आनंदविशेषार्थमेवेत्यर्थः अत एवोक्तं प्रियमिति अत्र च कश्चिद्विशेषः ।। श्रीविष्णुपुराणे ।। पुष्पबंधनसमान
कृतमानामपास्य तां नंदगोपसुतो यातो मार्गेणानेन पश्यत अनुयातैष समर्थान्या नितंबभरमंथरा या गंतव्ये द्रु
तं याति निम्नपादाग्रसंस्थितिः हस्तन्यस्ताग्रहस्तेयं तेन याति तथा सखि अनायत्तपदं न्यासालक्ष्यते पदपद्धतिः हस्तसंस्प

र्शमात्रेण धूर्त्तेनेषा विमानिता नेरास्यान्मंदगामिन्यानिवृत्तेलक्षितेपदं नूनमुक्तात्वरामीति पुनरेष्यामितेगतिकं तेनकस्सेतये
नैवात्वरितापदपद्धतिरिति साद्दश्यातदृर्शनैकजीवनावा अन्वतप्पतमुकुर्विल्लाप हानाथरमणप्रेष्टक्वासिक्वासिमहा
81 भुज दास्यास्तेकृपणायामेसखेदर्शयसन्निधिं हारवेदेआर्त्तिसंबोधनेवा ततश्चसर्वत्रैवयोज्यं नाथप्राणेश्वररमणेर
तिदायक प्रेष्टप्रियतम महाभुजगाढालिंगनदानारित्यर्थः एषांयथोत्तरंहेतुहेतुमतोस्या यद्वानाथप्रभो नकेवलं
तथाकिंतुरमणसुखप्रद विविधक्रीडाकारेतिवा अतः स्वभावतएवप्रेष्ट आत्मनः सकाशात्परमप्रियेत्यर्थः यतोम
हाभुजपरममनोहरसच्चिदानंदघनमूर्त्तेत्यर्थः॥यद्वा॥परमभोगकर्त्तः इतिसततरसादिसुखसंपत्तिर्बोधिता यद्वा
व्रजेश्वरत्वेननाथेति तत्रापिपतिप्रयोजनसिध्यारमणेति तत्राप्युपपतित्वेनप्रेष्टेति तत्रापिपरमसुंदरत्वादिना
महाभुजेति॥यद्वा॥क्वासिक्वासीतिपरमार्त्याविलयंतीसुविक्लवाभूमौनिपतंतीतदालिंगनमिच्छंतीस्मरंतीवाहमहाभु
जेति नचदूरेस्थित्वात्राहमस्मीतिवक्तव्यमितिआह॥मेमांप्रतिसन्निधिंदर्शयसन्निहितोभवेत्यर्थः कुतः दास्याः त
त्रापिकृपणायाः अन्यथामदंत्यदशायांसत्यांत्वयानुतप्तव्यमतएवेत्याशयेनाह हेसखेतिप्रियवयस्ये यद्वा सन्निधिदर्शनेच
कापिवंचनापूर्ववन्नकार्येत्याह सखेपरमविश्वासास्पदेति॥अथवा॥ननुप्रियतमेत्वांहित्वानाहंकुत्रापिगतोस्मित्वदंतिकएववर
त्तेइतिचेत्तर्हिसामहंमुग्धानपश्यामि सख्येनात्वमेवात्मानमभिव्यंजयेत्याह॥दास्याइति॥अन्यत्समानं यद्यपिविरह ८१

वैकल्येनानुसंधानाद्यगमाद्विलापेर्थसंगतिर्नापेक्ष्यते असंगतिश्च गुण एव तथापि तादृशीनां यत्किंचिद्वाक्यमेव सर्वार्थ
ः सेवते इति यथा भाक्ति किंचिल्लिख्यते एवमग्रेपि ज्ञेयं ततश्च सा विमुह्यहं तं भूमावपतदिति ज्ञेयं अग्रे मोहितामित्युक्तेः अ
थ वा स्कंधआरुह्यतामितीत्युक्ते प्रेमोत्कंठस कृतेन वैचित्येन पुरावर्तमानस्यापि कृष्णस्य तयानवलोकनादंतर्द्धये कृष्ण इत्यु
क्ते वस्तुतस्तु कौतुकित्वादेव स तत्र तूष्णीं स्थितः ततः प्रेमवैचित्यभाजस्तस्याः अनुतापः अथान्या गोपीः सन्निहितादृ
ष्ट्वा कृष्णेनांतर्हितमेवेति ज्ञेयं अन्विच्छंत्यो भगवतो मार्गं गोप्यो विदूरतः ददृशुः दृश्य विश्लेषमोहितां दुःखितां सखीं॥ वि
दूरतः अत्यंतदूरेपि ददृशुः तस्याः कांतिविशेषतः॥ यद्वा॥ विदूरतो न्विच्छंत्य अग्रतो दूरं गत्वान्वेषयंत इत्यर्थः॥ यद्वा॥
अकारप्रश्लेषेण अविदूरतः निकट एव ददृशुः ततश्च निजवैकल्यभरेण निकटेपि पूर्वं तस्यास्तमार्तस्वरं न शुश्रुवु
रिति ज्ञेयं एतस्याः श्रीकृष्णस्य विश्लेषाद्विछेदात् दुःखितां पश्चान्मोहितां च भूतलविलुठनलग्नधूलिकंटकक्षतरक्त
स्वेदाक्तसर्वांगत्वादीनां वकुलाश्रुधारालालापंकिलमुखवस्तनत्वादीनां लक्षणानां तादृशमोहस्य च तद्विश्लेषं विना
न्यथानुपपत्तेः मोहितामित्यनेन सर्वाभ्योऽन्याभ्योऽस्याः प्रेमविशेषोपि दर्शितः तासांहि विरहार्त्यापि च मरणादिकं अस्यास्तु
चरमदशा तु स्वमोह इति सखीं मिति तां तादृगवस्थापन्नां दृष्ट्वा सख्येन तुल्यव्यथा एव विशेषतश्च द्विगुणितनिजवेदनाः
सर्वा अपि परिवृत्त्यैं रुरुदुरित्यर्थः विश्लेषे स्वत एवेर्ष्यादेरपगमात् तथापश्चाद्द्रु प्रयतेस्तांसत्तां विचित्रचातुर्यैश्च

स्वस्थतांशनैरीषत् प्रापयामासुः ततस्ताः आश्वास्य तद्वृत्तं पप्रच्छुरिति च ज्ञेयं तयाकथितमाकर्ण्य मानंप्राप्तंच माधवात् अवमानं
चदौरात्म्याद्विस्मयंपरमंययुः ततश्च तयाकथितं सर्वमितिशेषः यद्वा पुनर्दुःखोदयभयेन ताभिरप्यंशेऽपि सखीनां समागमा
४२ त् स्वयमेव विलापरूपेण वर्णितं तद्वृत्तमितिशेषः इति पृथग्वाक्यमेकमेव वा ततश्च मानप्राप्तिमाकर्ण्य एवमग्रेऽपि यद्वाक
थितमेवाभिव्यंजयति मानेत्यादिना अवमानं परित्यागलक्षणं च निजदौरात्म्यान्मानादिलक्षणादाकर्ण्य चकाराभ्यामुभ
योरेव प्राधान्यं द्योत्यते तत्र तत्प्रकारेण रमणात् तथा कस्मादेव रसावसरे तत्क्षीताश्च माधवात् लक्ष्मीकांतात्प्रीतिः यद्वा मध
नामधरः रसेन क्रीडतिस दैति तस्मात् मानप्राप्तियोग्यापामतोऽप्यधिका काचिदस्तीन। नन्वहं।। तथापि केवलं तत् कारुण्यमाहात्म्येनैव न च
निजगुणेस्तादृशंमानं प्राप्नोतिभावः एवं मह श्रीभगवत्कारुण्यादिगुणातएव अवमानं च सर्वं निजदोषादेव वक्तव्यं मंत
व्यंचेतिसाधूतपि शिक्षयामासेति ज्ञेयं यद्वा श्रीकृष्णाद्दूरे आत्मा स्वयं यस्याः दूरे आत्मा श्रीकृष्णो वा यस्याः साद्दू
रात्मा तद्भावोदौरात्म्यं तस्मात् तद्दूरगमनादित्यर्थः परमं विस्मयं सद्यएव तादृगनुग्रहनिग्रहाभ्यां ततः परम
प्रेमवैयग्र्येण तया सहिताः पुनरप्यन्वेषयामासुरित्याह तत इति ततोऽविशन् वनं चंद्रज्योत्स्नायावद्विभाव्यते तमः
प्रविष्टमालक्ष्य ततो निववृतुर्हरेः यावद्वनं व्याप्य ज्योत्स्ना विभाव्यते लक्ष्यते तावद्वनमविशन् अपि प्रपतमन्वेषयां

मासुरित्यर्थः तमसा प्रविष्टं अन्यत घनत्वादंधकारमयमालक्ष्यानन्तस्तस्माद्घनान्निवृत्ताः २ तत्र तदन्वेषणासिद्धेः तथा च
श्रीविष्णुपुराणे ॥ प्रविष्टो गहनं कृष्णः पदमत्र न लक्ष्यते निवर्त्तध्वं प्रशंक स्यनेतद्दीधितिगोचर इति स्त्रिय इति स्त्रीणां मे
धकारवनप्रवेशे सामर्थ्याभावादित्यर्थः हरेरिति पाठोत्र केषांचित्तत्तः सच श्रीस्वामिपादानां असम्मतो राद्वतेतत्तनुः
इति पुनरुक्तेः समाधानार्थं तत्रतस्यैव हरेरन्वेषणादिति व्याख्यानात् अन्यथा ततइत्यस्य प्राग्लिखनायोगः हरेस्त
नइत्यन्वयाद्घसोऽष्टं वा तथापि स्वगृहान्न गच्छेयुरिति किं वक्तव्यं न च स्मृत वसोपीत्याह ॥ तन्मनस्कास्तत्प्रलापास्त
द्विचेष्टास्तदात्मिकाः तद्गुणानेव गायंत्यो नात्मागाराणि सस्मरुः ॥ आत्मागाराणि स्वतंत्र मनोज्ञसुखमयानीत्यर्थः
किंवा गृहकृत्यार्थमभ्यासवशेन गम्यानापि यद्वा आत्मानं देहं देवत्वं वा आगा[illegible]गृहाणि देहे गेहानि वा इति
भोक्तृभोगसाधनभोग्यान्युक्तानि तदस्मरणे हेतुः तन्मनस्का इत्यादिपदत्रयेण तस्मिन्मनोवाक्कायाभिनिवेश
उक्तः तत्र मनसोऽभिनिवेशः तद्गुणादिस्मरणेन तद्विषयकविविधसंकल्पविकल्पकादिना वा वाचः अन्योन्यं त
द्वार्त्तया कद[illegible] चित्तदालापनादिना च कायस्य च पूर्ववत्तच्चेष्टानुकरणेन प्रणामार्घ्यदंडवन्निपातेन तदर्थपुष्पमाला
ग्रथनशय्याविरचनादिना च अत एव तदात्मिकास्तन्मयाः किंवा उक्तप्रकारेण तदर्पितात्मानः अतस्तस्य

83

गुणानेदनतुपरित्यागेपिनैष्ठुर्यादिदोषान्नगायंत्यः गानंचश्रीभागवतोगीतप्रियत्वात् तथाचोक्तंतेनैव नाहंवसामिवैकुंठे
योगिनांहृदयेरवौ मद्भक्तायत्रगायंतितत्रतिष्ठामिनारदेति एवंश्रीभगवद्वशीकरणहेतुत्वाद्गानस्यसर्वतःश्रेष्ठत्वम
भिप्रेतं॥यद्वा॥तदानींतासांतदनुसंधानाभावेनकेवलंविरहार्त्तिभरस्वभावादेवतथापिसर्वार्तेनिर्देशात् तथाश
नेऽ: प्रत्ययांतत्वेनानुस्मरणेप्राधान्यात्तस्यश्रेष्ठत्वंसिद्धमेव तत्रवालापगानयोर्युगपदसंभवात् कदाचिदा
लापः कदाचिद्गानं कासांचिदालापः कासांचिद्गानमितिवोह्यं यद्वा॥तन्मनस्काइत्यादिपद्यचतुष्केणतासां
सदातनःस्वभावउक्तः अत्रएवाधुनाविरहार्त्त्यागायंत्यइति तदात्मिकाइतिपूर्ववदंत्यपदस्यापरिहारार्थंवा॥
यद्वा॥तत्परिहारार्थमेवतां विशिनष्टि विरहार्त्तिविवृद्धिस्वभावेनतदावेशेनवातस्यमनइवभयादिरहितंम
नोयासां तस्यालापइवगंभीरमधुरार्थभंगीपूर्वकनर्मादिमयआलापोयासां तस्यचेष्टेवविचित्रालिंगना
दिरूपश्चेष्टायासां तस्यआत्मादेहइवत्रिभंगानुकरणादिनामनोहरः आत्मायासांताः तथापितद्गुणानेवगायं
त्यइत्यादिनातत्प्राप्त्युत्कंठाविवृद्धेःवनतुनिवृत्तेतिचसूचितं अन्यत्तस्यपानेपुनःपुलिनमगात्यकालिंद्याः कृष्णभावनाः
समवेताजगुःकृष्णंतदागमनकांक्षिताः पुनःपुलिनमागमनंतत्रपरित्यक्ताअस्मान्श्रीकृष्णोनूनंकृपयासांत्वयि ८३

तुतत्रैवागतः स्यादितिमत्वा ध्रुवं वा तद्दर्शनाचाभावेनसहितं तत्र क्रीडास्थानस्यैव दिदृक्षया अत एवोक्तं कृष्णभावनाः कृष्ण
चित्ताकर्षकं परमानंदप्रदं वा भावयन्त्यः तत्रागतं मन्यमानाः किं वा कृतक्रीडं चिंतयंत्यः समवेता इति उच्चैः श्रीकृष्णस्य
श्रावणार्थं नदुःखपंचभिः सहेतिमायात्‌विरहस्वभावादेव वा कृष्णपरमानंदघनमूर्त्तिमिति तत्क्षणेनैव न किल
प्राणानिर्गताइतिभावः तदागमन एवकांक्षितया सामिति कथंचिदप्यन्वेषणानजाता तदागमनाकांक्षावचननिवृ
त्ता तत्रचागमनशब्देनास्यविरहार्त्तासंदर्शनमात्रमेवाकांक्ष्यते न त्वन्यदितिभावः ॥ इति [illegible] ॥ कृष्णैक
गम्यावागर्थौ यासां लेखितुमिष्यते ज्ञात्वापराधं देव्यस्ताः भक्तिंतन्वंतु मे निजां पीतश्रीगोपिकागीतसुधासा
रमहात्मनां श्रीधरस्वामिनां किंचिदुच्छिष्टमुपचीयते ॥ जयति तेऽधिकं जन्मना व्रजः श्रयत इंदिरा शश्वदत्र हि दयि
तदृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥ ६ ॥ अधिकं पूर्ववत् सर्वतो वा श्रीवैकुंठादपि वा व्रजेन जनत्रस्याल
क्ष्यते हियतः अत्र व्रजे शश्वन्निरंतरं यद्वा अधिकमित्यस्यात्राप्यन्वयः प्रतिमुहुरधिकत्वेनेत्यर्थः मूर्त्तिमती लक्ष्मी
रिव उत्तरोत्तरं वर्द्धमाना परमोत्तमा संपूर्णा सर्वसंपत् श्रयते अनपेक्षमाणापि स्वयमेव सेवते ॥ यद्वा ॥ वैकु
ठैश्वर्यपि सा भावेन किं वा संकोचितो निरंतरा वास्थित्यपश्रमा मामुकुरापात्तयात्ते वसति सदाभि

नवैवैकुंठादिधिकसंपत्तेः किंवाप्रतिग्रहंभ्रमस्मा परमविनयनम्रायालक्ष्म्याएवसाक्षाद्दर्शनात् हीतिनिश्चयेवा
तथाचोक्तं ततः प्रभृतिनंदस्यसदि मधुपुर्यामपिजन्मनाव्रजस्यैवोत्कर्षसिद्धेः किंवात्तासांव्रजएवतज्जन्म
८५ निश्चयाज्जन्मनाव्रजस्त्युक्तं एवंतत्प्रभावेनात्रत्यानां सर्वेषामेवसर्वमंगलंजातं केवलंदैवहतानामस्माकं
एवसंपद्दुःखं तत्राप्यधिकमिदंसर्वज्ञेनपरमदयालुनाऽस्मात्प्राणवल्लभेनापित्वयानज्ञायतइति तदधुनात्र
[illegible]तावदस्तुतन्मात्रमपिज्ञायतामितिप्रार्थयंते दयितेति दृश्यतां ज्ञायतां किंवासाक्षात्क्रियतां तस्यप्रत्यक्ष
त्वात्दुःखदर्शनेसतिपरदुःखकातरोवश्यंसाक्षाद्भवेदितिभावः किंतदाहुः दिक्ष्विति अनेनवकुलापरिभ्रमणा
दिदुःखंसूचितं तावकास्त्वयास्वीकृताः त्वदीयताभिमानवंतोवा अतःएवविचिन्वते अन्वेषणेनवदुः
खमनुभवंतीत्यर्थः अतस्तावकत्वेनैवैतद्दुःखं अन्यथातदनुत्पत्तिरितिभावः ननुनिर्बुद्धयस्तर्हिकस्यचि
दन्यस्यभवतः तत्राहुः दयितेति त्वदेकपर्येभ्योजनेभ्यः कथंचिदप्यन्यसंबंधमात्रमपिनरोचतेइत्यर्थः ननु
कइअवरहिअंपेम्मंणत्थिचिअइमाणेवेलोए जइहोइकस्सविरहेविरहेहोतंम्मिकोजिअइ इत्यादिन्यायेनदयि
तस्यविरहेदयितानजीवेयुस्तामसत्यं त्वतएवनम्रियंतइत्याहुः त्वयीतिमित्रेधतासवः त्वत्प्राप्त्याशयाजीवं

तीत्यर्थः यद्वा ।। त्वयिविषये त्वन्यस्तत्त्वेनप्राणेननतश्यंतीत्यर्थः एषुश्लोकेषुपदवर्णादिसाम्यापेक्षयाप्रायः प्रतिपदं द्वि
तीयाक्षरस्यैकं तथादलद्वये कुत्रचिदन्यत्रापिक्वचित् प्रथमाक्षरवक्ष्याक्षरयोरपिकुत्रापिकयांचिद्विचार्यं तत्रश्री
मुक्ताफलटीकाकारैर्विवृतमेवास्ति शारदशशांकसाधकजातसत्सरसिजोदरश्रीमुखाहृशा सुरतनाथतेशुक्लकदासि
किं कावरदनिघ्नतोनेहवधः ।।२।। मुरवेतिहृशः परमतस्करत्वंध्वनितं उत्तमकालेजलदुर्गेसाधूनांउत्तमद्रव्याणां न्यस्तलक्ष्मी
तुल्यमहाधनस्यहरणात् अतईदृशा चौरेण वधोपि सुघट एवेतिभावः वस्तुतस्त्वेवंदृशः परमसौदर्य्यमुक्तं दृशपे
त्वेकमयेवभावविशेषसूचनात्तत्वेभकत्वं यद्वा एकयापिदृश्येत्यर्थः अशुल्कदासिकाइतिमूल्यंविनाक्रीताअ
धमदासीरपीत्यर्थः संबोधनाभ्यांवधस्यानौचित्यंसूचितं वधेनसुन्दरदस्यभक्ताभीष्टप्रदत्वस्यचपूर्वंदत्तवरस्यवा
हानेः श्लेषेणसुरतेश्वरेति त्वयैवास्मासुतदिच्छाकारिता तत्रचवरदानेनदृढीकृतेतिनत्त्रास्माकंधार्ष्ट्यादिदो
षइतिभावः अन्यत्तेत्वोरव्यातं यद्वाननुप्राप्तवरअस्मन्मरणेत्वयिदोषप्रसंगः स्यादेवेत्याकूतः शारदिति दृशासु
रतनाथ दृष्टैवसंभोगकुरवप्रदोसीत्यर्थः निघ्नतः ताद्दृग्दानानाचरणात् वधः तज्जन्यंपापमित्यर्थः आ
युधतमितिवत् अन्यत्समानं यद्वा नादृशादृशैवतद्रूपेणशुल्केनदासिकाः किंवाशुल्कंविनैवदासीः निघ्न

85

तः विरहार्त्तास्त्यागेनैवेति स्वत एवायातिमदुपसत्तेः संबोधनद्वयं प्रणयकोपात् विरहार्त्ति विशेषाद्वा ॥ तथाहि ॥
सुष्ठु रतानां जनानां उपतापकेति निष्ठ्यतेरूपत्तापार्थकत्वात् निजवरच्छेदकेति वा दोऽअवखंडने अतो निजदोष
परिहारार्थमप्यागम्यतामिति भावः विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् वृषमयात्मजाद्वि
श्वतोभयादृषभ ते वयं रक्षिता मुहुः विषजलादिभ्यो गोगोपादीनां वर्षादिभ्यश्च सर्वव्रजस्यैव रक्षणेनात्मीयात्म
पालनात् किंवा तत्र तत्र श्रीकृष्णविषयकमांगल्येनैव सर्वरक्षामननात् वयं रक्षिता इति प्रेमोद्रेकेणोक्तं वृष
मयात्मजादिति भाविसूचितं सहजसार्वज्ञात् विशेषतश्च विरहात्यप्रेमोत्थविशेषबोधोच्छलनात् स्वत एव तत्तत्परिस्फू
र्त्तेः तस्य भावित्वेऽभूतनिर्देशः मुनिश्रुतत्वात् अहो कतिगणपाति वक्रम्भो विदुःरवेभ्यो रक्षिता इत्याहुः विश्वतः पूतना
शकटतृणावर्त्तयमलार्जुनेभ्यो बकवत्सदवानलादिभ्योऽपि भयादित्येवं पुनः पुनस्तैस्तयात्वदीयावयं रक्षिताः
तच्च तव युक्तमेवेति संबोधयंति ऋषभ मकाररूपादिनासर्वतः श्रेष्ठेति यद्वा व्रजेश्वरेति वयमित्यस्यष्ठनिर्देशः स्ववि
षयकोपकारविज्ञापनाय तच्चाधुनापि तदर्थं मुहुरिति तत्रौदासीन्यरहित्येन परमकृपालुत्वं सूचितं किंवा प्रे
मविवशानां तासां स्वभ्रमनोरथादे पुनः पुनस्तेषामेव साक्षादिव स्फूर्त्तेरभिप्रायेण पूर्वोक्तक्रमातिक्रमो विरह
वैवश्यात् किंवा श्रीकृष्णविषयकतत्तद्भये तेषां यथोत्तरं न्यूनतातिप्रायात् अतएवैते स्पष्टं निर्दिष्टाः ततश्च विषज

लाप्ययाद्व्यालाः सुधादृष्ट्या जीवनादिना वयं च व्यालोकमरेण तत्र प्रविश्य मरणे धृताः कालियमर्दनादिना अजगराच्च श्री
व्रजेंद्रः पूतनातः तन्निपातभयात्तस्मात् सर्वोपि व्रजः शकटार्जुनतो वत्सबकाघासुरेभ्यश्च सरवायः शंखचूडाद्वयं वर्षा
त्सर्वोपि व्रजः इत्येवं विवेचनीयं तत्र तेः इति दृष्टांततयोक्तं एवं सामान्येनैव वयं रक्षिताः स्म अधुना तु त्वदेकगतयो वयं वि
प्रयोगेण रक्ष्याः इति भावः अन्यत्समानं यद्वा किं शब्दः पूर्वपद्यादनुवर्त्तते ततश्चायमर्थः तस्मात्तस्मात्किमिति
रक्षिताः मारिताः स्याम चेत्तदैव भद्रं स्म भविष्यदित्यर्थः ततश्चैतेषां दु मो रक्षणापेक्षया यथोत्तरश्रेष्ठसमूहं विचित्र
क्रीडाकारि साक्षाद्दित्तद्धूर्त्तमानरूपो वहिरेव केवलं भवान्न भवति न खलु गोपिकानंदनो भवान् अखिलदेहिनामं
तरात्मदृक् विखनसार्थितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले किंतु अंतरप्येवं वर्त्तते इत्याहुः अखिले
ति। अतोस्माकमिदं हृत्तापवृत्तं भवान् जानात्येव किं तस्य वक्तव्येनेति भावः ननु सत्यं जानाम्येव किंतु कृतं
सर्वमवसर एव संपद्यते तत्राहुः विखनसेति स्वभक्तवरप्रार्थनया भक्तकुले वतीर्णेन भवता भक्ता अनवसरेपि
परिपाल्या एवेति त्वत्प्रयाणमस्माकमप्य वसरापेक्षा न युक्तेति भावः स्वयमधना भक्तापि तया स्वकृत निबंध
स्याप्यतिक्रमणात् तत्त्वार्थैर्गुरुपुत्रानयनादौ व्यक्तमेव ननु यूयं न मद्भक्ताः इति चेत्तथापि परिपाल्याः श्रीब्रह्मणा
सर्वेषामेव पालनस्य प्रार्थनादित्याहुः विश्वगुप्तये इति अतो निजभक्तवरप्रार्थनस्यावश्यपालत्वाद्वयं नोपेक्ष्याः

तिभावः किंच तत्रापि भावविशेषभाजो वयं विशेषतः परिपाल्या इत्यभिप्रायेणाहुः सखे इति ॥ अन्यैर्व्याख्यातं ॥ यद्वा
अंतरात्मदृगपि भवान् गोपिकानंदनो न भवति खलु किं अपि तु भवत्येव कथं तदाहुः विखनसेति अतो वयमानंद
80 नीया एवेति भावः यद्वा गोपिकानंदनः कारुण्यादिगुणरूपलीलादिनिजमाधुर्यप्रकटनपरः श्रीकृष्णो भवान्
न भवति किंतु परमात्मैवेति परमदुःखेन ज्ञानपक्षमंगीकृत्याहुः न खल्विति खलु निश्चितं ॥ इत्यधुना ज्ञातमि
ति सर्वत्रापि ग्रपि भावः किंचानविश्वगुप्तिः अविश्वगुप्तस्यैव विश्वसंहारस्यैवेत्यर्थः सात्वतां यादवानां एव कु
लेन तु गोपकुले जात इति च अन्यत्समानं अथवा हे सखे इति सोल्लुंठं ॥ नञः षड्विधत्वात् सर्वपदेष्वेवान्वयः
तेन हि असखे अप्रतिकूलेति खलु वितर्के श्रीयशोदानंदनो न भवति तथा सति तत्संबंधेन दामोदरत्वादि
भक्तवश्यताभरप्रदर्शनेन चास्माकमुपेक्षानुपपत्तेः ॥ यद्वा ॥ गोपिकाः व्रजसुंदरीः सर्वा आनंदयतीति तथा
सति तद्विपरीतासंभवात् किंच अखिलदेहिनां अंतरात्मदृगपि न भवति तथा सति अस्मद्दुःखज्ञानसंभवात्
न च ब्रह्मणा विश्वगुप्तये ऽर्थितः तथा सत्यस्माकमपि रक्षायायोग्यत्वात् सात्वतां भक्तानां कुले च नोदेयिवान् न
था सति सत्संबंधेनाति कृपाधिक्यपालुत्वासंभवादिति यद्वा सः प्रसिद्धो भवान् अखिलदेहिनामंतरात्मदृगिति
विश्वगुप्तये ब्रह्मणा सात्वतां भक्तानां कुलेऽवतरितुमर्थितः भवान् खलु खेऽस्माकमपाए उदेयिवान् इत्याकर्षणगु ८१

२२

णत्वेनासंगौदासीनत्वाद्भवान्गोपिनंदनो न भवतीत्यर्थः यद्वा उ इति पदं संबोधनेन भो गोपिकानंदन विखनां पितामहः
तेन च कुलस्य पितामहो गृह्यते प्रवगासैन्यमुलूकजित्ताजितमिति वत् अत्रोलूकशब्देन कौशिक उच्यते तेन च प्राकं
नात्रनेयार्थतादोषः तस्या काव्ये कविषयत्वात् अतो यमर्थः तव पितुः पित्रा विश्वगुप्तये विश्वेषां सकलानां कुल
वासिनां गुप्तये रक्षायै भवान् अर्थितः सत्वतानां भक्तानामेषां गोपानां कुले उदेयिवान् सांप्रतं रक्षादूरे स्तु हृदयदुः
खमपि न जानातीत्याकूः अखिलदेहिनामंतरात्मदृक् अंतर्हृदयज्ञोपि न भवति वाढमंतर्दह्यमानानामस्माकं पदेत्तां
महार्त्तिं विनाशयतीत्यर्थः व्रजेंद्र पित्रा सर्वोत्तमसंतानार्थी विखनसाराधित इति प्रसिद्धिः विरचिताभयं वृष्णिधुर्य
ते चरणमीयुषां संसृतेर्भयात् करसरोरुहं कांतकामदं शिरसि धेहि नः ॥ श्रीकरग्रहं ॥ विरचिताभयमिति मोक्ष
प्रदत्वमुक्तं कामिनामर्थिनां सर्वाभीष्टप्रदमिति त्रिवर्गदत्वं चै भक्तिप्रदत्वं च श्रीकरग्रहमिति प्रेम्नाप्रियजनवश्य
त्वं रसिकत्वं च एषां यथोत्तरं श्रेष्ठमूहं सरोरुहरूपकेण सहजशीतलमधुरत्वादिना स्वतः फलरूपत्वं सूचि
तमेव अतोनः शिरसि धेहि अस्माकं तु तत्सिद्धये इति भावः तत्र मोक्षो नाम निर्विघ्नप्रेमसंपद्यये विविधदुःख
परंपरा निवृत्तिरेवतेयः त्रिवर्गीयं प्रेमसाधनोपयोग्येव अन्यच्च भक्तानामपेक्ष्यमेव एतच्च प्रीतभक्तिसिद्धांतसत्तेयं

त्वासांतुमत्तेशिरसिश्रीहस्तधारणमेवपरफलं अन्यैस्तुतत्स्वभावमात्रस्तोत्रेणानुतत्प्रोग्यानयूयमितिचेत्तु।।सत्यं नि
87 जमहात्म्यापेक्षयाधेहीत्याहुः वृजिनधुर्यवल्मिंद्रेधुर्यदमनसमर्थइतिसर्पफणेकृपाकरणंदर्शितं यद्वा वृष्णि
धुर्यहे निजशोषणरूपादिमाधुरीषकदनाय्ययदुकुलेवतीर्णेत्यर्थः गोपानामपियादवत्वात् तत्स्वभावविशे
षेणत्वयाधेयमित्याशयेनाहुः कांतहेशयेति अन्यत्तैर्व्याख्यातं ।।यद्वा।।सरोरुहरूपकेणध्वनितं तापहरित्वादिनाहुः
खध्वंसनसुखापादनाद्यात्मकं सर्वार्थप्रदत्वं तथासहजशीलत्वादिनाचध्वनितं स्वतःपरमफलत्वमेवदर्शयं
तिविरचितेत्यादिना संसारभयादपिप्रपद्यमानानांविरचितं अभयंसर्वतोभयाभावोयेन अतोस्माकंपुनर्विरहभ
येनाश्रयेतिभावः कांतेचतत्कामदंचेतिस्वतःसर्वार्थरूपत्वंसर्वार्थप्रदत्वंचोक्तं कामदत्वात्कांतत्वस्यश्रे
ष्ठेनपश्चान्निर्देशपस्याप्यादौनिर्देशः श्रीभागवतामृतोक्तप्रीतभक्तिसिद्धांतापेक्षयातात्कालिकस्वाभिप्रेता
नुसारेणवा अतस्तत्प्राप्तिर्निजकाममूर्त्तिश्वाभिप्रेता नचसंभवेदेवेत्याहुः श्रीति।।नद्यकांतेनास्मास्वप्यपेक्षासं
भवादितिभावः।।यद्वा।।श्रीकरग्रहमपिधेहि त्वहेतुः वृजिनधुर्येत्येव एतदनुसारेणग्रेमनोरथंकुर्वत्ताक्रूरे
णविस्तार्य्यवक्ष्यते अप्यंघ्रिमूलेपतितस्येत्यादि तत्रकांतेत्यस्ययद्वेति कामदमित्यस्यचसमर्हणमितिविस्तारः प ८)

रं स्पष्टमेवेति यद्वाभयतः शत्रुभयेन संसृतेरित स्ततः संसरणात् पलायनात् चरणं मीयुषां प्रपद्यमानानां जनानां वृष्णि
विनाशेन विरचितमभयं श्रीकरग्रहं श्रीकराः संपत्करा रेखामयाः शंखचक्राद्यः तान् गृह्णातीति तथा तदैश्वर्यं विना
यमर्थः न केवलं शिरसि श्रीहस्तनिधानमात्रं कार्यं किंत्वस्माकं कामश्च पूरयितव्य इति प्राक्सूचितमेवास्तोत्सुक्यो
नाभिव्यंजयति ॥ व्रजजनार्तिहन् वीर योषितां निजजनस्मयध्वंसनस्मित भज सखे भवत्किंकरीः स्म नो जल
रुहाननं चारु दर्शय एतेन भजनस्य योग्यत्वमुक्तं ॥ अस्मद्यास्मदंतर्दशापत्या आर्तिहननासिद्धिः वीरेत्यद
यस्यापि दाने सामर्थ्यमुक्तं स्मयो मानः तव स्मितमात्रेण पिमानो निरस्यते तदर्थमेतद्धीनेनालमिति भावः
॥ यद्वा ॥ अनेनापरमनोहरत्वमभिप्रेतं अतस्तदवश्यं पद्रष्टुमपेक्ष्यत इति भावः सखे इति भजने प्रकारविशेषः
सूचितः ॥ यद्वा ॥ अभजने स्माकं दुर्दशायाः पश्चात्तयापि किल दुःखं लध्वंसखेन तुल्यव्यथत्वात् किं वा विश्वास
घातिदोषप्रसक्तत्वादिति भावः ननु तत्र तत्रादरो नास्तीति चेत्तत्र संदेहमाहुः भवतः किंकरीरिति दीनानां शरण
गतानामुपेक्षापरमासुक्तेति भावः ॥ यद्वा ॥ तर्हि वयं किंचिदस्य मनुगच्छतेति वेत्तत्राहुः भवत एव नन्वस्य किंकरीरिति
जलरुहवदाननं चारु यथा स्यात्तथेति प्रेम्णा सस्मितभ्रूविलासकटाक्षवलितं किं वनिकटागमनेन सम्पन्नं यादृशी
ये त्यर्थः जलरुहेत्युपमया दर्शनमात्रेण विरहसंतापहारित्वमभिप्रेतं योषितामिति तत्रास्माकं सामर्थ्याभावात्स्वय

मेवकृपयादर्शयेतिभावः ॥ यद्वा अनन्यजीवनानामस्माकमन्मथामरणमेवेति किंवात्तद्दर्शनसुखस्ययोषितांहृदयैकानुभ
वनीयत्वात्ताः प्रत्येवनदानं योग्यमितिसूचितं अनन्यैकव्याख्यातं ॥ योषितांमध्येनिजजनाः स्वत्परिग्रहाः स्वीयत्वेनस्वीकृता
 वा तेषांस्मयध्वंसनस्मितं अतएवनिजदासीर्भजेत्तत्प्रकारमेवाहुः जलेत्यादिना अप्यायययस्वनरुरुस्मितेन ॥ यद्वा ॥
योषितांवीर ॥ हे योषिद्वृन्दे समर्थेत्यर्थः अतोवयंस्मृतप्रायाएववृत्ताः तदधनाअभवात्किंकरीः अन्यथाअदासीरिव
भज चारुजलरुहाननं चनोदर्शयनदर्शय मरणस्यैवनिश्चितत्वात् इदंचप्रणयकोपेनपरमात्मीयोक्तं अन्यत्समा
नं प्रणतदेहिनांपापकर्शनं तृणचरानुगंश्रीनिकेतनं फणिफणार्पितं तेपदाम्बुजं कृणुकुचेषुनः कृन्धिहृच्छयं ॥ तत्त
श्चेत्तावकमसाधारणं किंवात्वदीयानामस्माकंकुचेषुकृणु निधेहि पापंसंसारदुःखंपरमोत्कटव्यसनंवातृणचरा
नुगामित्तिसर्वव्रजपशुपालकत्वेनकृपालुत्वं एवंचतुर्भिर्विशेषणैः पापहन्तृत्वादिकमुक्तं ननु किंतत्तदर्थमेवेष्यते
॥ नेत्याहुः हृच्छयंकृन्धीति अस्माकमेतदेवप्रयोजनंअंबुज रूपकंतुपूर्वोक्तसरोरुहरूपवाद्विज्ञेयं ॥ अन्यत्तैर्व्याख्या
तं ॥ यद्वा ननुनिर्भयाः पापदहविभेमित्याहुः प्रणतेति सकृत्प्रणाममकारिणामपि यथाकथंचिच्छरणागताना
मपिवाप्राणिनांपापहन्तृ कुतस्तवपापशंकेति किंकामदादिनासागरस्युपाश्रासुत्तरान्चरणेमपुक्तमितितन्त्रा
हुः प्रणतेति ॥ त्वत्प्रणतानामस्माकंभागेनस्पृशेदेव ननुतथापरमक्रूरेषुमृदुलतरंतद्दुःखशंकयाकथंचिन्नशक्यतेन

आहुः तृणेति तृणमप्येव न त्वदग्रतोन्यस्थानि शर्करादीन्यपि चरणं तिपरमार्द्रता सूचिता पशवः स्म यय मप्यनुकंप्याः इति भावः
ननु सुखं शोभनेषु पुष्पांकं स्तनेषु कथं पादार्पणं कर्तुं युज्यते इत्यत आहुः श्रीति। सर्वातिशयिशोभास्पदत्वात्तत्करणं वर्ण्यमे
व भावीत्यर्थः ननु तथापि भीरुस्वभावत्वात्सुखमत्यति भयो विभेति। तत्राहुः फणीति। यद्वा। फणिफणार्पितत्वेन विषाद्यनर्थ
ध्वंसनत्वमुक्तं ततो विषोपमहृच्छयमपि हृदि मदर्पणेन कृन्धीति भावः शिरसीति पूर्वं सर्वासामेकाभिप्रायेणोक्तं मूर्ध्नि
करार्पणमात्रेण सापत्न्यविशेषानुदयात् अधुना च स्तनेष्विति बहुत्वेन प्रत्येकं तेषु करणमभिप्रेतं अत्र रसविशेषेण सा
पत्न्यसंभवात् अतोन्योन्यं भेदानुत्पत्तये सर्वासामेव प्रत्येकं युगपद्विशेषेण सापत्न्यसंभवात् अतोऽन्योन्यं भेदानुत्पत्त
ये सर्वासामेव प्रत्येकं युगपद्विशेषेण तत्कार्यमिति भावः हृच्छयमिति अदृश्यस्य तद्रोगस्य तथैव प्रतिकार्यत्वात् अन्य
त्समानं॥ मधुरया गिरा वल्गुया बुधमनोज्ञया पुष्करेक्षणया विधिकरीरिमा वीर मुह्यतीरधरसीधुनाप्याययस्व नः ८
ततश्चाधरसीधुनाऽस्मानाप्याययस्वैः स्व अन्यथा सद्य एव म्रियेमहि कुतस्तत्र पूर्वोक्तयाऽधुना स्मर्यमाणया न हि
भवतीभ्यो मम कुत्रापि किंचिदन्यत् प्रियतममस्तीत्यादिलक्षणया मुह्यतीः मोहस्यास्मद्दशानुगत्वात् विरहेणाधी
धमाद्याजनितस्य मोहरोगस्य वैद्यशास्त्रोक्तनिदानविपर्ययेण चायेन तत्प्राप्त्यैवोपशमः सिद्धो न त्वन्यथा तत्रोपयुक्तमेवे
त्याहुः विधिकरीस्त्वदाज्ञाकारिणीर्गिरो मोहहेतुत्वं दर्शयंति मधुरयाऽमृतवाग्निश्चयया यद्वा मधुमयमेव साक्षा

दिवरात्रिं ददातीति तया रतिपरममादकत्वमुक्तं कथं तदाहुः वल्गूनि अर्थस्य प्रियत्वादिना शब्दस्य च सद्वर्णबंधनादिना मनोह
राणि वा मनानियस्यां तया अतो बुधानां विदग्धानां चित्ताकर्षिण्या इति श्रोत्रमनः प्रियत्वमुक्तं इमा इति प्रमत्तरत्वादिना असंद
89 ग्धत्वं तत्कालीनत्वं च मोहस्योक्तं ननु वाङ्माधुर्येण कथं मोहः स्यात् तत्राहुः वीर हे महासामर्थ्य पुष्करेति त्वद्गिरो पिताहृशात्वादि
त्यर्थः यद्वा कथमदेयं दातव्यमिस्यत आहुः हे वीर दयावीर दानवीरेति वा पुष्करेक्षण हे परमसुंदरेत्यर्थः उक्तावसरे सुंदर
दृष्ट्यादिना गिर एव विमोहनत्वमधिकमभिप्रेतं तथा च कर्णामृते पर्याचितामृतरसानि पदार्थभंगी वल्गूनि वल्गितविशाल
विलोचनानि इति अन्यतैर्व्याख्यातं। यद्वा गिरा मुह्यतीः अतएव विधिकरीः दासीत्वं गताः मोहेन विवेकापगमात् य
द्वा गिरैव विधिकरीः अधुना विरहात्त्वीदृ इमा मुह्यतीः अकारप्रश्लेषेण अबुधानामपि किमुत विदग्धानां यद्वा बुधानां
ज्ञातिनामपि किंपुनर्भक्तानां अथवा मधुरया श्रोत्रमात्रप्रिययेत्यर्थः वस्तुतस्तु अवल्गु वा मया अबुधमनोज्ञया त
थापि विधिकरीः कुतः इमा त्वत्प्रेमहृतविचाराः गोप्यः अतएव तत्सीधुं प्रति तदर्थं मुह्यतीः नौ प्याययनस्यैः स्वस्थय
किंतु मारयेत्यर्थः तदेवा विवेकिनी नाम स्मा कमुचितमिति भावः एषा प्रेमार्त्तिभरोक्तिः तव कथामृतं तप्तजीवनं क
विभिरीडितं कल्मषापहं श्रवणमंगलं श्रीमदाततं भुवि गृणंति ते भूरिदा जनाः ९ विरहादितप्तानां जनानां जीवयतीति तथा तत् नच
तस्य श्रवणार्थं प्रायसापेक्षत्वे तेत्याहुः कविभिः पूर्वैराधुनिकैश्च ईडितं स्तुतं अतएव संश्लाघ्यं वर्णितमित्यर्थः नच कामक्रोधादि

नापापेन वा तदर्थानुबन्धफलं सिद्धेदिति वक्तव्यं तस्यैव तन्निरसनस्वभावादित्याहुः कल्मषेति अतोर्थानुभवः स एव तत एव भवती
ति न च तदप्येवापीत्याहुः श्रवणेति यद्यपि केवलं हननं जीवनं तेन संयोगः सुखहरमात्रं किंतु कविभिः सर्वार्थज्ञापकत्वेन स्तुतं ॥ क
र्यं तदेव प्रपंचयति कल्मषापहं संसारध्वंसकं तस्य कल्मषैकमूलत्वात् सर्वदुःखध्वंसकं वा किंच श्रवणेति एवमुरुयशाः
खदोषहस्तेन मंगलत्वेन च सर्वार्थसाधनत्वमुक्तं स्वतः परमफलत्वं चाहुः श्रीमदिति एवमेषां यथोक्तसं श्रेष्ठं अतः क
थैवास्तु तं यथा तस्य दुःखदुर्गादिहरणात् बलपुष्ट्यादिकरत्वाच्च साधनत्वे मधुररसमयत्वात्साध्यत्वं च तथा कथा
याश्चापीत्यर्थः अतस्तं यथास्यान्न विस्तरेणेत्यर्थः यद्वा व्यापकमित्यर्थः इति देवभोग्यादिविशेषउक्तः तस्य व्यापकत्वाभावात् अ
न्येनैव्याख्यातं यद्वा अत्राधनानां दृग्भाजनाभावादस्मावं च विरहान्निर्विवशेयनत्तन्नाशक्तेर्वयं मृता एवेति भावः यद्वा अपरे परमभ
याः यावदाप्याययेय तावत्प्राणेम्यिथोम स्वत्रियाकालो नीयतामिति चेन्न अस्यास्याहुः कथैव मृतं मृतिमङ्गलं ॥ कार्यकारणयो
रत्यंताभेदविवक्षयोपचारः कुतः तत्तं जीवनं यस्मात् अतो ये तद्गुणं ति उच्चारयंति ते भूरिदाः देवस्वरवरे महाप्राणघात
कादित्यर्थः एषा परमार्थसूक्तिरेव ननु तर्हि कथं पुराणादिषु श्रूयेत तत्राहुः कविभिर्व्यासादिभिरीडितं कवीनां वर्णनमात्रस्वभा
वेन तस्यापि वर्णनादिति भावः पापनाशनमात्रं किंच श्रवणे वमंगलं सुखकरं ननु प्रयोजनेन यद्वा कविभिरीडितमित्यत्र हेतुः

कल्मषेत्यादिपदद्वयं पापहरत्वेन श्रवणयोः सुखदत्वेन च चैतैरीप्रतद्व्यर्थः अतएव श्रियामदो येषां राजादीनां तेषु आततं कवि
90 भिरेवविस्तृतं किं वा श्रीमदर्जुनेन व्यासगीतादिद्वारा ततं अतोधना त्वदाश्रयाद्दानं जिजीविषूनां तेनालमिति भावः अश्राव्यापि
चिरंजीवितुं न शक्नुम इत्याहुः प्रहसितं प्रियप्रेमवीक्षणं विहरणं च ते ध्यानमंगलं रहसि संविदो या हृदिस्पृशः कुहक नो मनः
क्षोभयंतीति नः १ भावेक्तोप्रकृष्टहसितं शुद्धभावेन स्मितमित्यर्थः प्रेमलावीक्षितं विहरणं क्रीडालेइत्यस्य प्रहसितादिभिः
सर्वैरप्यन्वयः ध्यानमात्रेणापि मंगलं सुखकरं यद्वा ध्यानस्य मंगलं शुभावहं सुखेन प्रेमध्यानसंपादकमित्यर्थः एतच्च
त्रयाणामपि विशेषणं अतएवोक्तं श्रीकपिलदेवेन ध्यानायनं प्रहसितमित्यादि हृदिस्पृशः हृदयंगमाः यद्वा स्मरणप
थमात्रं गतापि संततं याः संविदस्ताः सर्वा एवेति तासां सर्वासां हृत्स्पर्शकत्वं क्षोभणत्वं चाभिप्रेतं क्षोभयंतिकामेनाकुलयंति संवि
द इत्यस्य प्रातिके प्रयुक्तत्वेन तस्यैव विशेषणत्वेपि हृदिस्पृश इति सर्वेषां तस्य वचनविपरिणामेन सर्वैरपि योज्य तत्राद्यद्वयं
प्रायो भावत्वान्मानसं प्रहसितस्य भावमयत्वात् प्रेमणश्च मनोवृत्तिविशेषस्फूर्तेः विरहणं देहिकं संविदश्च वाचिकी इ
त्येवं त्रिविधा चेष्टोक्ता तेषां च क्षोभणत्वे यथोत्तरं श्रेष्ठत्वमूह्यं हि निश्चितं क्षोभणे हेतुः हे प्रियेति अन्यथा क्षोभणाशक्तेः
एवं त्वदेकप्रियत्वेन वयं सदात्मनः क्षोभं दुःखं लभामहे त्वं चास्मान् वंचयसे इत्याशयेन संबोधयंति कुहकेति अन्यतैर्व्या
ख्यातं यद्वा प्रियजने प्रेमतर्द्दनादि भावेन पुलकादिलक्षणं वीक्षितं विशेषेण प्रेमास्मितादिनार्द्रीकृतं ध्यानं प्रियजनस्य ९०

२६

ध्वेतातदेवमंगलं अस्माकमाशालंवनादिहेतुत्वात् सेविध्ः प्रतिष्ठितानि सर्वापेक्षया भवतीनामिदमनवृत्वमेवसंपाद्यमित्या
द्यलक्षणानि स्वाक्तस्यान्यथाकरणात् तथाधुनास्मदुपेक्षया तत्र तत्र सर्वत्रैवकापद्यपर्यवसाना च्युकुहकेति अथवा
ननुसुदृश्यंतत्रापिसाधीनांधैर्यमुपपद्येतेतिचेत् तत्रसप्रेमविकारंसदैन्यंचारुः प्रहसितमिति क्षोभयतिधैर्यहरंति न
तस्माल्लणोदधुनापियज्जीवेम एतदेवनः परमधैर्यविशेषितिभावः चलतियद्व्रजाच्चारयन्पशून् नलिनसुंदरंना
थतेपदं शिलतृणांकुरैः सीदतीतिनः कलिलतांमनः कांतगच्छति ११ ततश्चलनमारभ्यागमनपर्यंतमेवकलितास्
चिता व्रजेतदवसादानुत्पत्तिश्चोक्ता स्वयंताभिस्तच्छोधनात् पशूश्चारयन्निति विविधानांमनेतानांतेषांचारणार्थवर्त्म
परित्यागेन इतस्ततोभ्रमणाच्छिला दिभिरेवसादः संभावितः तथाप्यस्तयानिर्बुद्धित्वेन तेतस्मादाक्रतुर्गमपदेपिवतभ्र
मंतीतिश्लेषेणसूचितपदमेकत्वेपिद्वित्वमायात्येवेति पूर्वं लिखितमेव तथाप्यत्रार्थोयंज्ञेयः एकत्रापिकिमुतद्वयमिति
गोचारणप्रदेशस्य प्रायोघनमृदुतृणमयत्वेनभूतलवर्त्तिशर्करादेः संपर्काभावात्तत्रोक्तं अकिंचित्करकवनमित्या
दिहरिवंशोक्तेः सर्वत्रकंटकाभाव एव हरिदासवर्येणश्रीगिरिराजेनश्रीगोवर्द्धनेन तत्पार्श्ववर्त्तितदनुगगिरिव
र्गेणचस्वशिलानांश्रीपदाब्जन्यासपदेनवनीततांयमानत्वसंपादनात्तच्चात्रनोक्ताः नाथहेव्रजेश्वरेति तत्तवाप्र
कमिति कांतेति अस्मत्कोमलकरस्पर्श्यमेवतदितिप्रेमसंबोधनद्वयंकलिलतायांहेतुः विशेषाहः तेनाधिक
लिलतापिसूचिता यद्वानाथत्वेनसर्वेषांव्रजजनानांकांतत्वेनचविशेषतोस्माकमितिभावः यद्वा नाथएवंवि

यंजनोपतापक ननु विवेकिन्यस्त्वर्हि अवसादहेतु मद्विषयकचिंतां त्यजतां तत्राहुः कोन्नेति प्रियजनचिंताया विवेकेप्यपरिह
र्यत्वात् यद्वा कलिलतागमने हेतुः नाथहे प्राणेश्वरेति ननु यावतः कुरु ते जंतुः संबंधान्मनसः प्रियान् तावंतोऽ
९। स्य निखन्यंते हृदये शोकशंकवः इत्यादिवचनेन प्रीते र्दोषत्वप्रतिपादनात्प्रीतिरेवानिरस्यतां तत्राहुः कांत हे मनोहरेति
अलमतिविस्तरेण अन्यत्रैव व्याख्यातं यद्वा सीदतीत्यप्येत इतिरेतच्चिंतया कलिलतां वेकल्पमिति अतो वनभ्रमणं विहाय
अत्रैव द्रुतमेहीतिभावः एवं संपूर्णे दिनं दुःखेनैव वयं गमयामः सायं व्रजे त्वदागमनेपि दुर्भगा न सुखं लभामहे इत्याहुः दि
नपरि●क्षये नीलकुंतलैर्घनरजस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीरयच्छति १२ दिन
स्य परितः क्षये अस्तंते सतीति दुःखाधिक्यं सूचितं नीलाः कुंतलाः कुंतला अलकाः तेषामेवोपरि श्रीमुखस्यावरणेन
शोभाभरापादनात् अत एवाग्रे वक्ष्यते मुखं मुकुंदस्य गुडालकावृतमिति तै रावृतमित्यादिना परमसौदर्य्यमभिप्रेतं ।
तच्च मुहुः स्मरार्पणहेतुः तथा दिनपरिक्षये इति च तस्य कामोदयेवलत्वात् कुलावृतत्वादिकं सहजसौदर्य्यपरिकर
त्वेन बिभ्रन्नकरपर तत्र नोस्मान्दर्शयन् यदि चादर्शयन् स्वगृहांतः प्रविशसि तथापि मुहुः कामार्प्पणं नस्या
दितिभावः मुहुरिति गोसंकलनादिच्छलेन पुनः पुनः परितो वरुथान्निरीक्षणेन स्मरार्प्पणस्यापि पौनःपुन्यं यद्वात्कथं
चिद्विचारभरेण संवियमाणस्यापि स्मरस्य मुहुरर्प्पणमुद्दीपीकरणं मनसीति स्मरस्यांतःमनोव्यापकत्वमप्रतिका
र्यत्वं च स्नेहेण स्मरमितिपः स्मरणमात्रेण क्षोभकः तेसां ताघच्छयसीति तत्र सामर्थ्यं दर्शयंति हे वीरेति किंवा

त्रैवत्तवदीरत्वं नचान्यत्रेति सरोषनर्मोक्तिः अन्यत्तैर्व्याख्यातं यद्वा घनरजोविभ्रत् अत एव स्वलेसुष्ठुत्वं कृतं यद्वा विश्र
द्वेणेमिति प्रोषः मोहभयेन प्रेमवैवश्येन वासादात् तदुच्चारणाशक्तेः यद्वा घनं वेणुलता एंरजस्त्रगव्यमेव विभ्रत् अहो व
जांतस्तादृशवेशदर्शनापिस्मरोभूत् अधुना च वनात् तन्निशिरसर्थे नागरे वेशेन तत्रापि विरहे स्मरणे विशेषेणासौ व
र्द्धते वेति विलंबं माकुर्विति भावः एवं गीतेन जातस्मरक्षोभान् पूर्वतो विशेषेण वर्ल्लयंत्यः प्रार्थितमपि वेयर्थ्यान्पु
नः प्रार्थयंते प्रणतेति द्वाभ्यां प्रणकामदं पद्मजार्चितं धरणिमंडलं ध्येयमापदि चरणपंकजं शंतमं च ते रमण नस्तने
ष्वर्पयाधिहन् १३ प्रणतानां कामदं अभीष्टदं इति सर्वार्थप्रदत्वमुक्तं अत एव पद्मजनार्चितमिति परस्मैश्वर्यं धरणि
भूतलं सुंदरासाधारणलक्षणैः ध्वजादिभिः प्रेमभक्तिप्रवर्तनेन च मंडयतीति तथा तत् इति सौंदर्यकृपालुत्वं च ।
ध्येयमापदीति भक्तिविघ्नादि सर्वापन्निवर्तकत्वं अनेन भक्तिप्रवर्तनमेव दृढीकृतं एवं सर्वार्थसाधनत्वं पूर्ववत् पंकज
रूपकेण सूचितं दुःखाद्विध्वंसेन कामदत्वेन च दर्शितः स्वतः परमफलत्वं चाह शंतमं चेति प्रायणेन दात्मोद्देशेन
तद्भूयानुसारेण संबोधनद्वयं विवेचनीयं अतोऽस्माकं विरहादिव्यथानाशाय विचित्रक्रीडादिना सुखं च संपादया
तथा आत्मानं चार्पयेतिभावः अन्यत्तैर्व्याख्यातं यद्वा प्रणतानां भक्तानां ब्रह्मादीनां कामदं पद्मजया लक्ष्म्या
अर्चितं इति परमसौभाग्यनिधित्वं धरणि लक्ष्मी द्विती यानिजा प्रियां विचित्रक्रीडयास्तनोपर्यर्पयस्थितमप्यर्चमंड

नेकुचकुंकुमादिनाचित्रादिनिर्माणेनचालंकारो यस्या इतिप्रियजनपरशत्वं रसिकत्वंच एवंलक्ष्मीतोपिधरिण्यां प्रेमाधि
९२ कोध्वनितः सचश्रीवाराहादिपुराणोक्तोप्रसिद्धएव ध्येयमापदीतिविरहदुःखमोचकत्वं शंतमं परमसुखप्रदंसुखा
त्मकंच एवंपदद्वयेप्येषांयथोत्तरंश्रैष्ठ्यं तेत्वदीयानांनः अतोऽर्प्पणंयुक्तमेव किंचहेरमणेतितत्रापितवरतिशीलत्वा
दिसर्थः अधिहन्नितिअन्यथास्माकमंत्यदशापत्त्यातवाधिहंतृत्वकीर्तिलोपःस्यात् अस्यैवविस्तरोग्रे श्रीमदक्रूरमनोरथे
यदर्च्चितमिति तत्रप्रणतेत्यस्यविस्तरः ब्रह्मेशादिध्येयमित्यस्यप्रभुभिरिशिति धरणीत्यस्यसात्वतैरितिगोचारणायेतिच
शंतममित्यस्ययज्ञोपिकानामिति एवंपूर्वमुक्तात् पापहंतृत्वादिमाहात्म्यादत्रकामदत्वादिनाविशेषउक्तः त
त्रचपूर्वंद्वितीयपद्येनिजदैन्यनिवेदनपूर्वकमेवप्रार्थनं अधुनाचगीतक्रमेणश्रीमत्प्रियतमपादपंकजेमनोभिनिवे
शविशेषात्तस्यैवसुखाद्यपेक्षयाकेवलंतत्तदेकवर्णनेनैवेतिभेदः किंचपूर्वंतत्प्रयोजनंसाक्षाद्वोक्तंहृच्छयमित्यधीति
अत्रचअधिहन्नितिसंबोधनद्वारापरोक्षवादेनैवतस्योत्कर्षः भंग्याप्रोक्तत्वात् तेनचपूर्वस्मरार्त्तैरेव अधुनाचा
शेषमानसपीडायानाशइति ॥ सुरतवर्धनंशोकनाशनंस्वरितवेणुनासुष्ठुचुंबितं इतररागविस्मारणंनृणांवितर
वीरनस्तेधरामृतं १४ सुरतंसुशोभनंरतंरतिः प्रेमकिंवासंभोगस्तुखंवर्द्धयतीतितथातत् इतिमुकुल्लिधेपितस्मिन्न ६२

२८

त्वष्टि: सूचिता निजधार्ष्ट्यादिकं च परिहृतं शोकः अकृतार्थत्वादिना विरहेण वा तं नाशयतीति तथा तदिति अन्यथा शोकनाशो
न भवतीति सूचितं तथा स्वरितेति गुणविशेषेण परममादकत्वमुक्तं तन्नादस्य जगदुन्मादकताहेतुसंपर्कमात्रकत्वात् इति
तेनैव सर्वदुःखविस्मृतिर्न त्वन्यथेति ध्वनितं यद्वा पूर्वोक्तवेणुभागपभराभिप्रायेण तत्सुष्ठु चुंबितं तया परममधुरत्वं सौभाग्य
भरत्वं च चुंबितमिति भोगनाचरणेन तद्धीणत्वापि परिहृता त्वणं यानि इतरासि अधरामृतव्यतिरिक्तानि सार्वभौमादि
मोक्षांतसुखानि तेषु रागविस्मरणं इति परममोहनत्वं एवं तद्दर्शनसुखादपि वैशिष्ट्यं सूचितं तादृशप्रियजनैकप्राप्यत्वात्
एवं विशेषणानामेषां यथायथोत्तरं क्रमेण हेतुहेतुमत्तोह्या न च तवादेयं किंचिदस्तीत्याशयेनाह: वीर हे दानशूरे
ति यद्वाश्लेषेण कंदर्पयुद्धवीरे तत्र धक्क मे वेति भावः वीरेति किशोरं प्रति संबोधनं मध्यदेशरीत्या तेन च रसिकत्वमेव
बोध्यते अत एव तस्य पौनःपुन्यं तथापि संगत्यनुसारेणार्थभेदो लिख्यते अन्यपततेर्व्याजितं यद्वा स्वरितेन षड्जादि
स्वरं प्रापितेन वेणुना त्वणमपि किमुत नारीणां तेषां तत्प्राप्तिस्तांबूलचर्वितादिसंबंधेन कथंचिद्भूया यद्वान्यणां
मध्ये वीरेत्यन्वयः अर्थः स एव इतरेति तस्मिन्प्राप्ते पुनरन्यत्र किंचिन्नेष्टव्यमिति प्रार्थनेनो चातुर्य्यं यद्वा इतरत्र त
तोऽन्यत्र सर्वं स्वविषयकरसोत्पादनेन विस्मारयतीति सदा तदेकप्राप्त्यर्थं निजोत्कंठादि परिहारार्थं च तत्स्वभाव एवो

क्तः एवं पूर्वं तो वविशेषः स्पष्ट एव अत एव पूर्वं शीघ्रमेति अत्र चामृतमिति अटति यद्भवानह्नि कानने त्रुटिर्युगायते
त्वामपश्यतां कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशां १५ काननमटतीति श्लेषेण रसज्ञत्वमभिप्रेतं अक्री
93 ति तदानीं तत्र निजगमनाशङ्किरुक्ता युगायते सुखसमयस्यातिक्रमत्वेन विवृद्धिमिव गतत्वात् इति परमदुःखं अतोऽचिर
मदर्शनदुःखमसह्यमिति स त्वरं दर्शनं देहीति भावः अपश्यतामस्मादृशजनानां किं वा सर्वेषामपि व्रजजनानां किमुतास्
माकमिति यद्वा त्वज्जनानां कुटिलाः कुन्तलाश्चूर्णकुन्तला उपरिभागे यस्मिन् तत् अत एव श्रीमुखं श्रीयुक्तं मुखं वेणुधा
रणादिना वा उदीक्षतां चेति चकारान्वयः अन्यैर्व्याख्यातं यद्वा दुर्वितर्क्यप्रकृतेस्तदापि त्वत्तोऽस्माकं न किंचित्सुखं जातं किंत
दर्शने दर्शनेपि दुःखमेवेमाकुः अटतीति पूर्वार्द्धेनादर्शने दुःखमुक्तमेव दर्शेऽपि दुःखमाकुः कुटिलेति जडः अनभिज्ञः
अनिमिषत्वाकरणान्न दृश्यत इति शेषः तादृशश्रीमुखस्य संदर्शनासंपत्त्या तदानीमपि दुःखमेवेत्याकुः अहो एवतास्माकं परमदौ
र्भाग्यमिति भावः तथापि दर्शनात्क्षणं नितरां बोधितेव दर्शने निमिषमात्रव्यवधानासहिष्णुत्वात् यद्वा उदीक्षमाणानां सतां
पक्ष्मकृत् कृती छेदने यः पक्ष्माणि कृन्तति स एव जडः रसज्ञः विद्वान्वा यद्वा दृशां पक्ष्मच्छिन्न जड एव उदीक्षतां उच्चैः
पश्यन्तु वयं तु पक्ष्मयुक्तदृशो जडाः सादाद्वपि किं पश्येमेति भावः एवमाधिरूढदशयापि संदेहैव पतिसुतान्वयभ्रातृबांध
वानतिविलंघ्य तेऽन्त्यच्युतागताः गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि १६ बांधवा मातापित्रा

यः एषां पूर्वोक्तानां सुतादीनां व्याख्या अतिः तेषां वा अतिक्रमात् नु स्नेहादिपरित्यागात् सातिशयेन विशेषेण च धर्माद्यनपेक्षया समूल
त्वेन लंघयित्वा अतिक्रम्य आगमने हेतुः हे अच्युतेति प्रपन्नजनरंजनादिमहात्म्यतः कदाचिदपि विच्युतेरसंभवादित्यर्थः
किं च गतिं स्वभावं आत्मनोऽस्माकं च वेत्सीति गतिविदः यद्वा तव तानं अभिज्ञत्वं विदंतीति गतिविदो वयं सुव्रतत्वादिस्व
महात्म्यं अस्माकं च त्वदेकगतित्वं जानासीति विवेद्यः किंवा कारुण्यादिमयं त्वत्स्वरूपं जानंत्यस्त इत्यर्थः किं च उद्गीतमोहिताः
कितव हे कपटिन् निजस्वभावामध्याकरणेन निशीथरात्रौ भीरूणां स्त्रीणां त्यागेन चित्तं एवेति भावः त्यजेदिति संभावना
यां सप्तमी कितवेति संबोधनेन कः कितवोपि त्यजेत् अपि तु कितवोपि त्यक्तुं न शक्नुयादिति अतस्त्वयि न केवलं धूर्त
त्वं परमाकृतज्ञत्वमपि पर्यवस्येदिति भावः अथवा रात्रौ निर्जने निजांतिके उद्गीतेन रिरंसया आगाः कृष्णानीतानां गोपसुंदरीणां
पश्चात्त्यागात् धूर्त एवासीत्यर्थः अतो व्यक्तीभूतधूर्तत्वं अधुना दर्शनं देहीति भावः अन्यत्तैर्व्याख्यातं यद्वा धूर्तत्वे सप्तत्रयो
वित्तः वयद्वयमपि धूर्तास्तव धूर्तत्वे सर्वं विस्मरे वेत्फलमस्मात् धूर्तत्वेनेति भावः एतच्च दर्शनप्रार्थनं चानुयुक्तं ति
जकृतज्ञत्वापेक्षया दर्शने क्षणमपि न विलंब स्वोत्पाक्ष्य येन पूर्ववतो विशेषमाहुः रहसि संविदं हृच्छयोदयं प्रहसिताननं
प्रेमवीक्षणं बृहद्‍रः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः ७ पूर्वं संविदं इत्युक्तं अत्र च संविदामिति एकाम
पि संविदं किमुत बहवीरित्यर्थः हृच्छयस्य हृदि सुप्तवन्निश्चेष्टतया लीनस्यापि कामस्य उदयः प्राक संयस्मात् तत्

इदं च । हसिताक्षीनां सर्वेषामपि विशेषणं ज्ञेयं यद्वा तव हृच्छयोदयं कामविकारं भावविशेषविलसितास्मितगंडपुलका
धरविस्फूर्त्यादिलक्षणं प्रकृष्टं हसितं यस्मिन् श्रीआननेतत् प्रकृष्टहासपुल्लाननमिति वा प्रेमग्लदीक्षणं पूर्ववत्सर्वहृद्यं
९५ वा वहदिति गणलिंगनाभिप्रायेण परमसौंदर्यमुक्तं श्रियो धामेति श्रीप्रतिस्पृहायां हेतुविशेषः सापत्न्यान् शोभाविशे
षाच्च वीक्ष्य आलोच्य चिंतयित्वेत्यर्थः स्थितानामित्यध्याहार्यं किं वा भिन्नकर्तृके क्त्वाप्रत्यय आर्षः अत एव भिस्पृहमिति
चित्सुखः अतिस्पृहार्यं किं वा भिन्नकर्तृके क्त्वाप्रत्यय आर्षः अत एव भिस्पृहमिति चित्सुखः अतिस्पृहा च तत्तदनुभवा
यत्तत्संगममात्राय वा तया च मनो गुरुत्यतीति स्पृहायाः परमोत्कर्षं द्योत्यते किं वा पूर्ववन्निजधैर्य्यं त्यानिरे वोक्ताः यद्वा
रहास्ति संविदं प्रतियत् प्रहसिताननादिकं वा एवं सति रेक्षेत्येवार्थः ततश्च पूर्वं दृष्टानां तेषां अधुनास्मरणाद तिस्पृह
दिकमिति पूर्ववज्ज्ञेयं यद्वा पूर्वमपि तथा तथैव भवेत् अधुना तत्तदतिशयेन मरणमेवासन्नमिति भावः अन्ये त्वेवं व्याख्याति
यद्वा श्रियो धामापि इति सापत्न्याक्रांतत्वेन दोषः यद्वा ते श्रियः विविधाः शोभारूपवेषलीलादिविषयकाः इत्यनुक्तमप्य
त्यन्तसौंदर्यादिकं संगृहीतं धाम चलनतां गृहादिनकेवलमतिस्पृहा मनश्च मुह्यति परममोहनात्तन्माधुर्यात् अन्ये
न मनसोऽनिर्वारत्वादप्रतिकार्यत्वं तेन निजपरमदैन्यं च सूचितं अथवा ननु कृतज्ञोस्मि कथमेवमत्यंतातीभव
येति चेत्तत्रैव वरुधामाहृतत्वादित्याशयेन तदेककारणत्वेन पूर्ववत्संविदादीनां परममोहनत्वमेव परमार्त्या विशि ८४

प्राहुः रहसीति तेरहस्यस्य पूर्वतः परता स्यादन्वयः ते संविदादिकं प्रहसिताननादिकं वा वीक्ष्यतेऽपि स्पृहा नेऽपि मन इति आदर्शादेरि
रीदर्शनादिनाभावविशेषोदयात् इति ते चापरममोहनत्वमुक्तं अतोऽस्माकमतिस्पृहामनो मोहयत्युज्यत एव अतो याव
दत्वद्दर्शानन्तरं भवेत्तावदेव संदर्शनं देहि ततएव कृतसंदर्शिकं दिति भावः अतो धनेदं विधेहीति सर्वतेफलितं निष्कृष्याहुः
व्रजेवनौकसां व्यक्तिरंग ते वृजिनहंत्र्यलं विश्वमंगलं त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनं १८
व्रजौकसां वनौकसां चेत्यर्थः ते व्यक्तिः अवतारः प्राकट्यं वा अतोऽतः तद्दीनमस्तु त्वमिति भावः अंगेति प्रेमसंबोधने नकेवलं वृजिन
हंत्री विश्वमंगलं अशेषमंगलरूपा च अलमतिशयेनेत्युभयतोऽप्यन्वयः ततो वृजिनस्यापुनरुद्भवत्वादिकं मंगलस्य च
भक्तिप्रेमादिसंपत्तिपूर्वकं प्रतिक्षणाभिनवसुखपरंपरादिरूपत्वमूह्यं स्वजनानां या हृद्रुजः कामाः किं वा उत्तापास्तासां नि
तरां सूदनं स्वजनत्वात्तत्तव विदितमेवेति भावः एकशब्दप्रयोगः प्रेमार्त्तिभरेण ननु मद्भक्ता मयि प्रेमभाक्ति सदा संदर्शने
तदर्थं श्रीवैकुण्ठादिकमपि वांछंतीति जानाम्येव तत्राहुः त्वयि त्वत् प्राप्त्यर्थमेव स्पृहा किं वा तव या स्पृहा रिरंसा तत्स्यामेवा
त्मा मनो येषां तेषां नः ईदृशीरस्मान् प्रतियद्देयं स्यात्तदेवेति भवः मनागिति परमदौर्लभ्येन याच्चकरीत्यावा नस्त्वत
स्त्वद्धृद्रुजामिति वा हृत्त्वेन निःशब्देन च तथा तद्विषयककामना निवर्त्तित्वेन प्रस्तुतसंदर्शनं वनवत यावद्विपुलत्वेनैव निरंतर विवि

धप्रेमरतिरभिप्रेता अन्यैस्तैर्व्याख्यातं यद्वा हे स्वजनस्त्वत्स्पृहात्मनां नो या हृद्रुजस्तासामिति एतावत्पर्यंतं निजेष्टमेव वरुधाप्रा
र्थितं उपसंहारे च श्रीभगवतोवनाटनमनुसंधायतेन च श्रीपादाब्जयोर्व्यथां संभावयति ज प्रार्थितमप्यनाहृत्य प्रेमभर प्रधर्षिताः के
95 वलं तत्सुखमेव प्रार्थयमाना रुदत्यश्राहुः यत्ते सुजातचरणांबुरुहं स्तनेषु भीताः शनैः प्रियदधीमहि कर्कशेषु तेनाटवीमटसि
तद्व्यथते न किंस्वित्कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः १९ अंबुरुहरूपकेण सिद्धेपि सुकोमलत्वे सुजातेति विशेषणं ततोपि परम
कोमलत्वविवक्षया भीता इत्यत्र शनैरित्यत्र हेतुः कर्कशेष्विति श्लेषेणैव नित्यं नवयौवनं तेन दुःखाधिक्यं च निवेदितं दधी
महीत्यत्र हेतुः हे प्रियेति प्रियत्वेन तेष्वेव तत्स्वधारणयोग्यत्वात् एवं पूर्वोक्तं नलिनसुंदरत्वमपि स्वानुभवेन दृढीकृतं
तेनाटवीमटसि अधुना निशि वनेभ्रमसीत्यर्थः यद्यपि प्रेमोद्रेकवैवश्यात् पूर्वोक्ताननुसंधानेन पौनरुक्त्योपि नैव दो
षप्रसंगः किंतु गुण एव तथापि चलसीति पूर्वं दिवाभ्रमणमुक्तं अधुना चाटसीत्यनेन रात्रविति भेदः कल्प्यः दिनाचारण
यत्तृणमप्रदेश एव परिभ्रमणान्कूर्पादिभिः संबंधो न स्यादित्युक्तमेव रात्रौ चाधुना संभवेदेवेत्युक्तं कूर्पादिभिरिति आ
दिशब्दात् कर्कराद्यः यद्यपि श्रीवृंदादेव्यादियत्नेन श्रीवृंदावनस्वभावेन च तेषामपि तत्र सत्त्वाशंका नास्ति तथाप्यतिव्या
शंकौ निर्बंधहृदया निर्भर्त्स्यादिन्यायेन तासां सा संजायेतैव अतः स्वयमेवोक्तं किंस्विदिति भ्रमति मुह्यतीत्यत्र हेतुः
भवदायुषामिति अतस्तैर्व्यथासत्स्वस्मज्जीवन एवोत्पद्यते तदधुना प्राणान्धारयितुं कथंचिदपि न शक्नुमइति भावः

एवमध्धनामूछया पूर्वतोधिकव्यथासूचिता नयसीति पाठे गच्छसीत्येवार्थः नयपयगतावितिधातोः सर्वातेवचनमिदं श्रीराधा
देव्याः स्वजनेत्यादिना स्मारितायाइवसेयं तत्रचहृज्जुंजां निसूदनमिति तेन पादाङ्गेनाटव्यटनमेवहृज्जुजः ततोनिवृत्तेरेवतान्निसूदन
मित्यर्थः तथापि संदर्शने पर्यवस्यत्येव नरत्तिवकुत्वं निजसखीवर्गाभिप्रायेण एवंश्री[illegible]चरणारविंदस्य परमकोमलत्वेनवनपरि
भ्रमणे व्यथामाशंक्य तदुद्दिश्य वारद्वयमुक्तं अतः स्तनेषु तस्य धारणमपि वारद्वयं प्रार्थितं सारंगाणांपदांबुजमित्यादिना
येनैव तात्कालिकदैन्येन तस्मिन्नेवासक्तेः तथा श्रीमदधरामृतमपि वारद्वयं प्रार्थितं तस्यैव निजजीवनहेतुत्वात् तथा श्रीमुख
स्य च मुहुर्धर्षितं तेनैव विशेषतो मोहितत्वात् एवमन्यच्चोह्यं सहृदयैस्तदेकरसिकैरिति इत्येकविंशः ॥ ॥ इत्युक्तप्रकारेण
पूर्वोक्तमन्यच्चेत्यर्थः अतएव तैर्व्याख्यातं इति एवं प्रभृतीति एतदादिकमित्यर्थः यद्वा चित्रधेत्यस्य विशेषणं उक्तवहु
प्रकारेणेत्यर्थः प्रकर्षेण प्रेमोद्रेकाद्गुञ्चे गायेत्यः कदाचित्प्रकर्षेण लपत्यस्य यद्वा विलपंत्यः किंवा विरहव्याकुलया
किंचिदनर्थकं वचस्तत्संत्यः चित्रधेत्यस्य पूर्वेण परेणाप्यन्वयः सुस्वरं करुणदीर्घस्वरेणेत्यर्थः कृष्णस्य चित्ताकर्षकस्यद
र्शने लालसायासामिति रोदने प्रागायणेदौवासर्वत्र हेतुः हेनाथन्निति तद्दर्शने लालसया तद्धरूक्रमेवेत्यार्त्तिसंबोधनं अन्यत्ते
र्व्याख्यातं ॥ तत्रइति गोप्यइतीत्यधिकं लेखकभ्रमादिति अथ वाक्यदर्शन लालसात्रेपि अधनादरेण इति इत्येतत्पूर्वोक्तं श्री
राधादेवीगीतमेव सर्व्वोः प्रकर्षेण तद्धिष्टचित्ततया परमासत्यागायंत्यः प्रकर्षेण लपंत्यश्चतासां तादृशी मार्त्तिंगतानां श्रा

विरमद्दृष्टोऽस्मभव इतिपरमात्मैव तत्प्राप्तिरितिदर्शितं यद्वा तथारुदतीनां अथनामद्दुःखसंभावनयादैन्यविशेषेणरोदनाप्राणगतप्रायाइस्ततोहेतो
रित्यर्थः एवमात्मानपेक्षयातदेकरूपेक्षयैवदैन्यविशेषेणतत्प्राप्तिरिति शौरिः शूरवंशेजनिर्गुणरूपाद्यशेषभगवन्नामकनार्थमवतीर्णो
९६ भगवानित्यर्थः अथिमाविभावेहेतुः शेषेणसर्वासामेवसुगोपत्संतोषणसामर्थ्यंदर्शितं स्मयमाननमुखांबुजमेवनतुहृदयांबुजं तासां
तादृगार्त्तिरोदनाद्यस्यस्मयमाननतास्वभावतएव किंवातासांशोकनाशनाद्यर्थं पीतांबरधरः धावनेनेवत्वरया विभूयगमनान्स्खल
त्पीतांबरं किंवातासांगलदश्रुधारासंमार्जनार्थमस्त्री हस्तेनैकेकेनधरतीतितथास्तः स्रग्वीतिकमलादिपुष्पैस्ताः शीतलयितुं यद्वाप्रियजनार्त्ति
कातर्यभरेणनिजापराधक्षमापणार्थमिवतत्रएवतु स्त्रीदंतांतिकेस्त्रीहस्तेननिजवस्त्रांचलंगृहीत्वावस्त्रमिवस्त्रीगलेमालांचवधत्यर्थः ए
वंवैदग्धीविशेषप्रकटनेनतासांपरममोहनत्वात् साक्षान्मन्मथमन्मथइति।। अथवासौंदर्यादिकमेवैतैर्विशेषणैरुपलक्षितं तत्र
सौंदर्यस्योपलक्षणं स्मयमानेति भूषणानांचपीतेति विषविलासस्यस्रग्वीति स्वकुचकौटोवज्ञेया कुंदस्रजः कुलपतेरित्युक्तेः
रात्रौचतस्याएवशोभाविशेषसंपत्तेः अन्यदपिवैदग्ध्यमाधुर्यादिकमुपलक्षयति साक्षादिति तथा विरहाति रवित्रानामापितासां
कामोद्बोधंतस्यापिकामोद्रेकंसूचयतीति अन्यत्तैर्व्याख्यातं यद्वामन्मथादपिमन्मथः महामन्मथइत्यर्थः तस्यैवमहामोहनताशक्ति
सागरगणेशप्राप्याकामदेवस्यमोहनताशक्तेः अतोऽयमेवपरमकंदर्पः अतएवकंदर्पबीजमस्यमहामंत्रबीजं श्रीमदनगोपा
लइत्यादिसत्त्वयाप्युच्यते आगतामितितासामभिप्रायानुसारेण यद्वातासांमध्येप्रादुर्भूतं किंवा आदौदूरेप्रादुर्भूयागमनक्रमे २६

३२

एणनिजांतिकं प्राप्तं संतं तथा श्रीविष्णुपुराणेऽपि ततो ददृशुरायांतं विकासिमुखपंकजमिति अत एव विशेषेणालोकयित्वा दृष्ट्वेति रोदनवैवश्येन
ईषद्दर्शनेऽप्यदर्शनात् किंवा दृष्टेऽपि परमात्मीयविश्वासाभावात् सम्यग्निरीक्षेवेसमर्थे· अत· प्रीत्या प्रहर्षेणोच्चैः फुल्लाविकसिता दृशो नेत्राणि
यासां तथाभूता· सत्यः अबलाः विरहतापमतयोत्थातुमसमर्था अपि सर्वा युगपदुत्थिता· तत्र हेतुः प्रेष्ठमिति तदेकप्रेष्ठत्वेन मरणे जीवने च
तदेकहेतुत्वात् तदेवदृष्ट्वा तेन साधयतितन्वय इति यद्वा आदौ प्रीत्युत्फुल्लदृशो बभूवुः पश्चात्तु तस्थुः यथा तनूनामप्यादौ स्पंदनादि पश्चा
त् स्वस्वकृत्ये प्रवृत्तिरिति आगतमिति पुनरुक्त्या उत्थाने आगमनेकहेतुता बोधिता अधुना तथागमनात्सर्वासामेव विरहतापा
पगमं परमोत्सवादिकं च षड्भिर्वदत्वादिदोषप्रसक्तेन तासु मुख्यानां प्रसिद्धानामष्टानां प्रेमचेष्टितान्याह काचिदिति पंचभिः करांबुज
मेकं तथा व्यवहारस्य परशोभनत्वात् अंबुजरूपकेण सहजारुणपादिसौंदर्य्यतापहारित्वं च व्यंजितं अंजलिनेति निजभावानुसारेण मु
देति विरहदुःखनिवृत्तेः इदं चाग्रेऽपि सर्वत्रानुवर्त्त्यं तस्य तेवासौंदर्य्यादिनाऽनिर्वचनीयं वाहुं शौरेरित्यनुवर्त्तित एव एवमग्रेऽपि चंद
नेन रूषितं भक्तिच्छेदेन लिप्तं इति सौंदर्य्यतापापहारित्वं चोक्तं अंजलिनेति पूर्ववत् किंवा वकुललताभाग्यापरमरससमयत्वात्
पतनशंकया वा यतः तन्वी विरहेणातिकृशा तांबूलं श्रीभगवतैव नागरशेखरेण सदा चर्व्यमाणं वर्त्तते किंवा श्रीवृंदादेव्याद्युर्व्वि
तं तेनेयं अंघ्रिकमलमेकं स्तनयोर्न्यधात् इत्येतस्यास्तदर्थमुपवेशो ज्ञेयः श्रीभागवदुपदेशस्याग्रे तत्रोपविष्ट इति वक्ष्यते तस्य तयो
र्न्निधानहेतुः संतप्तेति अन्यथा विरहतापकामज्वरयोरनपगमः हृदय इति पाठेऽपि स एवार्थः प्रेमसंरंभेणैव भ्रुकुटिमासम्यकूव

धापस्त्वात्प्रेमसंरंभ विद्रुता बभूवेति शेषः ऐक्षतेतिपरेणान्वयः तथाच श्रीविष्णुपुराणे काचिद्भ्रूभंगुरं कृत्वा ललाटफलकं हरिं वि
लोकयंती नेत्रभृंगाभ्यां पपौ तन्मुखपंकजमिति अस्याश्च कयाचित्प्रवाणाद्दत्तेपि घूर्णती वेदत अत्रापि प्रेमसंरंभ एव कारणं ज्ञेयं निर्दिष्टपद्मनष्ठ
97 देत्युक्तेः प्रेमेत्यनुवर्त्तते द्वी जुषाणा सेवमाना प्रीत्या वीक्ष्यमाणेत्यर्थः आपीतमिति दृक्पोऽस्य चषकं चेद्धुनितं परमप्रीत्या सम्यग्दृष्टम्
पीत्यर्थः संतः प्रीतभक्तैकनिष्ठाः नइतिमधुरप्रेमणः प्रीतभक्तेर्धोतत्यभावं प्राप्तावेसाम्यमभिप्रेते किंतु सा रागाणं पदांबु
जमित्यादिन्या येनत्तेषां श्रीपादांबुजे भक्तिः आसां तु प्रेयसीनां अधरामृतादिलोभेन प्रायः श्रीमुख एव राग इति प्रेमवैशिष्ट्यं
सूचितमेव अत एव तेषां श्रीपादाब्जयोः कोमलत्वादिः प्रायः साक्षादननुभवादब्जादिरूपकाप्रयोगः काचित्परमलज्जादि
गुणेनासाक्षाच्चिरं प्रभुं दृष्टुमप्यक्षमा अत एव नेत्ररंध्रेण द्वारेण हृदि कृत्वेति मनसि सर्वांगस्फूर्त्या तत्तद्दृशोभसौंदर्याद्यनुभवा
द्येमिवेति निमीलयनेत्रे एकास्मिन्नेवांगे लग्न योरन्येषां मनस्यपिदर्शनासंभवात् किंवा नेत्रद्वारेणनिः सरणभयादिव वि
स्तृत स्तत्र तत्प्रेमसंप्लुत त्वस्वभावेनैव अत एवोपगूह्य हृदि तमालिंग्य चकारात् कृष्ण कृष्णेति कीर्त्तयंती तथाच श्री
वैष्णवे पुराणे काचिदालोक्य गोविंदमायांतमतिहर्षिता कृष्ण कृष्णेति कृष्णेति प्राह नान्यदुदीरयदिति काचिद्भ्रुकुटिमित्यत्र
यद्यप्येकैव गोपी व्याख्यायते तदात्र पराधाराक्तेयमन्यैव ज्ञेया आनंदरसेऽनंतनिमग्नासती आस्ते क्षणमासीदित्य
र्थः योगीध्यानयोगेन भगवति चित्तैकाग्र्यं गतः तथाच श्रीवैष्णवे काचिदालोक्य गोविंदं निमीलितविलोचना तस्यैव

रूपं ध्यायंती योगारूढेव चाववभूविति वहिर्वृत्त्यभावमात्रे दृष्टांतः तत्र नेत्ररंध्रेणेति तस्मादप्यस्या विशेषः सूचितः ध्यानेदर्श
नादपि साक्षात्संदर्शनेत्यंतानंदात् तच्च श्रीभागवतामृते विवृतमेव तत्रापि काचिदिति गोपीत्वेन भावविशेषात् अतएवा
लिंगनाच्च साक्षात्संदर्शनवत् पार्श्वदादिभ्यः गोपवर्गादिभ्यश्चानंदविशेषः सूचितएवेति नोमिं चंद्रावलीभद्रायप्राशैव्या
म●नुक्रमात् विशाखाललितौ राधामित्यष्टौ श्रेष्ठतां गतः तत्तन्नाम्नामग्रहणे कारणं पूर्वं लिखितमेव यद्यप्यासां प्रेम्णि
तारतम्यं वा कुत्स्यं न घटते प्रत्येकं सर्वासां तस्मिन् प्रायः परमकाष्ठापत्तेः अतएव करांबुजग्रहणादिवृत्तासंपत्स्वभा
वानुसारे एतदानीं तन्नेष्टानुसारेणैव वा प्रवृत्तिः तथापि मुकुंदाग्रणे पूज्यश्रीवैकुंठपार्षदवराणामिव तासामपि कथंचि
त्तारतम्यकल्पनया तत्रापि मुख्यत्वेन प्रसिद्धानामष्टानां तासु च पि श्रीराधादेव्याः सुप्रसिद्धेन सर्वतो वैशिष्ट्येन श्रेष्ठ्यं तत्त
च्छ्रुतज्ञा वा नानात च्चेष्टितामृ●प्यूहं अतएवाष्टौ तथा तथा पृथगुक्ताः न च केवलं ता एव निस्तापा हृष्टाश्च बभूवुः किंतर्हि
सर्वाश्चापीत्याह सर्वा इति केशाः सुंदरावर्त्तितेऽस्येति केशवः अस्त्यर्थेवः तस्य आलोकः ईषद्दर्शनं तदेव परमउत्सवः सर्वा
र्थसमुच्चयः चित्तोल्लासो वा तेन निर्वृता इति विरहतापाधिक्यं निर्वृत्यनंतरमेव तत्त्यागसिद्धेः यद्वा आलोकस्तेन सम्य
ग्वीक्षणं परमोत्सवश्च प्रेमनर्मादिताभ्यां निर्वृताः तत्रानुकंपो दृष्टांतः प्रकर्षेण आसम्यक् जानातीति प्राज्ञः श्रीकृष्ण
तद्भक्तादिमहात्म्यातत्त्वाभिज्ञो महाभागवतोत्तमः तं कुत्रापि गंतुं पुनः प्राप्य प्रकर्षेण लब्ध्वा प्रीत्या वरुध्यासंगम्य तद्विरह

जंतापं आकारप्रश्लेषे णअजनतास्यस्यापि विश्लोऽर्जुनावेक्षवायथाजहातितद्वदिति अस्यच सुप्रसिद्धत्वेनतथारामरावणयोरपि
वैस्यादिन्यायेनतदेकयोगपत्वेनचदृष्टांतत्वं ततः श्रीभागवतोपिपरमनिर्वृत्त्याभगवत्तासाराविर्भावनाधिकशोभाजातेत्याहत्ताभि
९४ रिति विधूतः निरस्तः शोकोविरहजोऽतस्तापोयाभिः ताभिः तद्विशेषश्चोक्तः श्रीपराशरेण ततःकाश्चित्प्रियालापैःक
श्चिद्भ्रूभंगवीक्षितैः निन्येऽनुनयमन्याश्चकरस्पर्शेनमाधवः इति अतस्ताभिर्वृतः सन्भगवान्सर्वैश्वर्यसंपूर्णोपि अच्यु
तःकथंचित्कदाचित्कस्माच्चिदपिशोभाभरान्नच्युतिरहितोपि अधिकंयथास्यात्तथाविशेषेणअरोचततत्रशोभत
भगवानिति अधिकविरोचनेहेतुर्वा तेनैवाशेषनिजभगवत्तासर्वस्वप्रकटनादित्यर्थः स्वतएवाशेषशोभायाःपरांका
ष्ठांप्राप्तस्यापिताभिर्वृतत्वेनाधिकरोचनंदृष्टांतेनसाधयति पुरुषइति जीवः प्रत्येकविनस्वतः सर्वशक्तियुक्तोपिइंद्रिया
दिशक्तिभिः प्रकटताभिः सतीभिरेवयथाधिकंविरोचते अन्यथामूर्छितादितुल्यताप्राप्तिः एवंमाधुर्यकारुण्यादिगु
णप्रकटनेननिजवल्लभावलिवृतत्वेनैवाधिकातस्यापिशोभास्यात् अन्यथाभक्तवंदसेव्यमानत्वेनाप्यशेषशो
भामयभगवत्तासारापूर्तिप्रसक्तिरिति अतएवाश्चर्येणतद्बोधयोग्यत्वेनवाताश्चेतिसंबोधनं यद्वा तत्स्म
रणात्प्रेमवैवश्येनैवपूर्ववत् विशाखोक्तस्यरोचनेवैशिष्ट्यस्योपकरणांतरमपिदर्शयति तइति द्वाभ्यां स
म्यक्प्रत्येकंसर्वासामेवहस्तधारणादिनाआदाय रासयोग्यपुलिनांतरंगंतुंपूर्वपुलिनतोगृहीतत्वान्निर्विश्य
प्रविश्यमध्यमधिष्ठायेत्यर्थः विभुर्व्यापकइतिएकस्यापिसर्वासांयुगपत्समादानादिसमावेशार्थं पुलिन १८

स्यकामोद्दीपनसामग्र्या रासक्रीडायोग्यतां दर्शयन् तद्दिशिनष्टि विकसदिति सार्द्धेन वायोः शैत्यं पुलिनसंबंधात् मांद्यं च षट्पदास्पद
त्वात् सौरभ्यं च व्यक्तमेव शरदिति चंद्रांशुस्पांसु प्रसन्नतासंदोहेति चंद्रस्य पूर्णिमाध्वस्तदोषेति रात्रित्वापगमेन दिनवत् प्रकाशश्च सूचितः कृष्णा
याः श्रीकृष्णस्य नामत्वेन स्ववर्णत्वेन च सख्यं प्राप्ताया अतएव रुहस्तेति किंवा विचित्रशोभाभादिना तस्यापि चित्ताकर्षिकायाः तदेवाह हस्तेति
हस्तैरिवाचयनेन स्थलीवैषम्यकठिनांशराहित्यादिकं धनितं अन्यत्तैर्व्याख्यातं यद्वा तासां मादयेत्ताभिः सह तदेव पुलिनं निर्विशपमध्यप्रदे
शं प्रविश्येत्यर्थः विशेषेणभवतीति विभुर्वैभवेतिशेषः निजवैभवं प्रकटयामासेत्यर्थः तच्च दर्शनेति द्वाभ्यां वक्ष्यते अन्यत्समानं तनोति
हृष्टानां प्रेमसेवामाह तदिति तस्य क्रीडविशेषोत्सुकस्य विभोः दर्शनेनाह्लादस्तेन विशेषतो धूतानाशिता हृद्रुजः सर्वाधयो यासां तथा
विधेनतेनसह तत्रागमनेन रासक्रीडानिधारात् विधूतशोकाभिरिति पूर्वं विरहशोषमात्रस्यनाशनं अधुनात्वशेषहृद्रुजामिति
भेदः अतोमनोरथांतं ययुः यद्वा उपगम्यितं तत्रेयं मनोरथांतमिव ययुः रासक्रीडाप्रत्यासत्तेः यथाश्रुतयोपि तद्गुणादिवर्ण
नांतं प्राप्ताः इव भवंति न तु साक्षाल्लभंते साक्षात्प्राप्तेः साचोक्तैव श्रीब्रह्मस्तुतौ अद्यापि यत्पदरजः श्रुतिमृग्यमेवेत्यादिना य
द्वा तस्य विभोर्ह्लादेन विधूता हृद्रुक् विरहार्त्तिलक्षणायासां तथाभूताः सत्यः मनोरथस्य तद्दर्शनविषयकस्य अंतं समाप्तिं ययुः
पुनस्तदुक्तिरत्यंतविच्छेदस्य विरहतापस्यापगमेपि तत्संस्कारस्य तु क्रमेणैवापगमात् श्रुतयोपीश्वरं दृष्ट्वा क्रमेणैव कामजा
लं त्यजंति यद्वा मनोरथानामंतं निष्ठां यस्मादधिकोन्यो मनोरथो नास्ति तं प्राप्ताः क्रीडाविशेषमेष्यन्तीत्यर्थः श्रुतयोपीश्वरं दृ

~~ष्टा क्रमेसैव कामसञ्जा स्तं पश्यन्ति यद्वा मनोरथानामंतं निष्ठं यस्मादधिके मीम मनोरथो नास्तित्वं प्राप्ताः कोऽपि विशेषः~~ तद्भक्ति
विशेषमिच्छंति अत एव आसनमची क्लृप्तन् विचित्रचारुप्रकारेण रचयामासुः केः स्वेः स्वयं परिहितैः उत्तरीयैः कुचकंचुकोपरिवि
९९ न्यस्तैः कंचुकस्य सूक्ष्मतरवस्त्रत्वात् विरहरोदनधारापाताच्चकुचकुंकुमेनांकितैर्भूषितैः रित्यर्थः ननु कथं लज्जा ताभिः परिहृता
कथं वा प्रभवेत्कुचकुंकुमांकैरुत्तरीयैरासनं दत्तं तत्राह आत्मेति आत्मभ्योऽपि बंधः प्रेयान् तस्मै आत्मकोटिप्रेष्ठायेत्यर्थः अतोऽस्य भूस्पु
पवेशनपरमसंहः खापत्तेः सख्यं प्रेमविशेषश्चेत्यर्थः आसनकल्पनं पुनस्तिरोधानशंकाकुलत्वेन नन्वेवावस्य विरह्विषया स्वाभिप्रेता
र्थस्यापि पूज्ञा परिपाटी विशेषो यद्वा अन्यत्ते व्याख्यातं एवमुक्तोत्तरीयेण तस्य चातिसूक्ष्मतया सर्वोच्चपि विस्तीर्णे आसनार्थ एकत्रैव
किं वा स्वस्व गवादिभेदेन पृथक्पृथगेव कल्पयामासुरिति ज्ञेयं ईश्वरः परमस्वतंत्रोऽपि भगवान् सर्वैश्वर्यपरिपूर्णोऽपि सः रसि
कशिरोमणिः प्रेमामृतावर्त्तवर्द्धनश्रीकृष्णचंद्रः तस्मिन्नासने उपविष्टः सन् चकासे यद्वा भगवान्निमित्तेनैव तस्य भगवत्तासार
प्रकटनमित्यभिप्रेतं ईश्वर इति सर्वेशात्किम तं पृथक्पृथक्कल्पितासनसमूहेत्तासां स्वस्यचसंतोषविशेषार्थं तत्तदलादिते
त्वेनैव एकस्यापि पृथक्तयेवोपवेशात् योगेश्वरैः सिद्धिसमाधिभिः श्रीसनकादिभिरपि श्रीरुद्रादिभिरपिवात्रतहृदि एका
ग्रतां प्रापिते चित्ते कल्पितं मानसपूजायां तदुपवेशार्थं विचित्ररत्नादिना प्रयत्नेन रचितं अर्पितं वा आसनमेवं यस्य इति तस्य
साक्षात्तत्स्वीकारोऽपि नास्तीति व्यंजितं तादृशोऽपि चकासे तत्र हेतुत्वेन तं गोपीनां परिषदं सभां प्राप्तः वतुलमंडलाकारेणोपवि ९९
ष्टानां तासां मध्यवर्त्ती सन् अन्येनापि पूर्वं वेदैश्वर्यमूल्यं किंच अर्चितः ताभिः संमानितः आसनकल्पनेनैव किं वा तांबूलादिसमर्पणेन

नर्मादिनाकटाक्षादिनावा अत एव त्रैलोक्येति श्रीभगवद्वपुषः सर्वदा त्रैलोक्यलक्ष्मीपदत्वेपि प्रधनात्: सर्वकाला द्वैशिष्ट्यं पूज्यते अनेनक्षा
शनप्रकारोपि दर्शितः सभाजयित्वेत्यनुवादः प्रश्नार्थसभाजनस्य सम्यक्त्वविवक्षया किंवा पुनर्विशेषेण संमान्येत्यर्थः येतः अनं
गंअंगरहितमपि कामं दीपयन्ति सांगीकृत्य पूर्ववनोपि प्रकल्पयन्ति इति तथा तं अत्यंतकंदर्पाभिवर्द्धनमित्यर्थः अत एव तासामंके कृतयोः
तामिस्ते नैनेववान्यस्तयोस्तस्यांघ्रिहस्तयोः अंके हस्तस्य किंवा अंघ्र्योर्हस्तयोरंकोत्यर्थः सम्यक् स्पर्शनेन विविधपरिपाट्याशनैः
शनैः सुखसंवाहनेन एवमपि पूर्ववदैश्वर्यं दर्शितं सर्वाभिरपि द्वयोरंगयोः श्रुतुर्लब्धवात्ते षां युगपत्संस्पर्शनात् सम्यक् स्तुत्वा
प्रश्नविशेषार्थं तदुत्तरश्राप्त्यर्थं च ईषत्संक्षेपेण एवं भावरे परमवाग्मित्वात् ततस्त्वकुपिताइति पूर्ववद्: स्वभाषेः किंवा तेन कपटा
तिरेकेणकंचनात् यद्वा कोपं विना अभिप्रायाज्ञानेन हृष्टस्तुत्तरालभ्यत्वादिति अन्यतैर्व्याख्यातं यादृग्जातश्रुभ्रूवा कृत्वा अ
नंगादीपनं किंवा न थैव सभाजयित्वा तामिस्तस्य तथा सभाजनमेव युक्तमित्याशयेनाह अनंगेति उभयानूभजतोऽभजतश्च
इति प्रश्नत्रयं तच्चाकृतज्ञत्वादिपरिहारेण पुनः परित्यागाकरणदार्ढ्यार्थं साधयथास्यात्तथा एतद्ब्रूहि तेनैके किंवा तेषां
फलं तत्सर्वं विविच्यास्मान्प्रति सुबोधं कथयेत्यर्थः भोइतिसंबोधनेनावधापयेति तत्र निजदोषपर्यवसानेन तस्य मनो
ऽनभिनिवेशात् स्वार्थेः निजदृष्टमात्रफलार्थं एव तस्मिवाएकांतः तस्मिन्नेवैकस्मिन्नंते निष्ठा यस्य तथाभूतः उद्यमो येषां
ते इतिश्रीगुरुसेवमियोवैष्णवैः प्रणामादिकं च परिहृतं तत्र तत्र सद्धर्मादिसद्भावात् आत्मानमेवेतिलोकदृष्ट्यापरोपका

रसंभावितं धर्मादिकं निरस्तं प्रत्युपकारापेक्षयैव भजनात् एवं दोषपरिहारापेक्षयाप्रत्युपकारेऽपि धर्माद्यभावः तथा जजनेतारत
स्याभावो प्रयुक्तः अन्यथा उपकारप्रत्युपकारयोः सत्फलाभावेनानुभजनासिद्धिः एवमेवानुभजंतिच्छायावत् भजनानुसारेण भजंती
ति प्रश्नस्योत्तरं सिद्धं अतो यत्र प्रत्युपकारापेक्षापि तत्र धर्म इति सूचितं हि निश्चयेनान्यथा उक्तादन्यप्रकारेण तत्र मिथो भजनं न
100 स्यात् यद्वा तत्र तत्र मिथ्यात्वं नास्तीत्यर्थः सखेनैव कथनात् यद्वा आत्मनोऽपि तासु तादृशभजनाभिव्यक्तरूपप्रकारेण मन्वा
नः सहजसख्येन तत्परिहरन्सवोधयति हे सख्य इति अन्यत्रैव्यभिख्यातं तदिति पूर्ववदेव अत इत्यर्थबलादायान्येव यद्यपि तत्रा
प्यन्योन्यमुपकारेण दृष्टसुखं घटेत तथापि स्वोपकारजनितत्वात् प्रत्युपकारस्यावश्यापेक्षत्वात् धर्माभावेन तात्विकत्वाद्यभावादपि
विचारेण सुखं नावश्यं वपर्यवसेदिति नच सुखमिति व्याख्यातं यद्वा उन्मत्तवद्गीयताम् इत्यादिवत् लोकपक्षभ्रमेणैव तत् वक्ष्य
माणानुसारेण अतदनपेक्षत्वात् स्वार्थार्थमिति पाठोऽपि श्रीवित्सुखादीनां बहूनां संमतः ततश्चात द्वजनमन्यार्थप्रतीयमानम
पि स्वप्रयोजनार्थमेवेत्यर्थः अन्यत्स्पष्टं अथवा स्वार्थमेव उद्यमो येषां जननानां ते हि ते यथा राजसेवकाः वित्तद्वे
तनिकाद्यः हि प्रसिद्धौ अत एव प्रायो लोकानां सर्वेषामेव दृष्टार्थपरत्वात् ते विशेष्यस्य स्पष्टं न निर्दिष्टाः अभजतः देसाद्दिन्या
बाल्यादिनाच वैप्रसिद्धो तथेति दृष्टांतेन निरुपाधिसहजकारुण्यमभिप्रेतं ते हि श्रीभागवता एव तत्र कृतत रां मत्कृतात्म
नामित्यत्रैतेर्व्याख्यातमेव तथापि करुणाः पितरो च्चेति चकारेध्याहार्यः निरपवादः संपूर्ण इत्यर्थः तैः प्रत्युपकाराद्यन १००

पेक्षयाकेवलमत्यंतकृपालुत्वेनैवोपकारात् सौहृदंचनिरूपवादं तयो सहजास्निग्धत्वात् केवलसौहृदोक्तिः पुत्रपालने
पित्रोर्द्वयोर्धर्मानुत्पत्तेः यद्वा कथंचित्तेनापितयोर्द्धर्मोद्रष्टव्यः ततश्चतेषां तयोश्चसतश्चेति हेसुमध्यमाः हेसुंदर्यः
तितदेवसौंदर्यमिति यद्वा तत्र युष्मासु भावेवेति भावः इदंचतासांसामात्मभजनार्थंचातुर्यं वैएव नैवभजंतीति हि
तोनिश्चयेन नकृतंतज्ञ्जनंजानंति अनुसंदधतीत्यकृतज्ञाः लोकाद्यपेक्षावत्वे पित्रुपकारसामर्थ्याभावस्तानेनतद
करणमूर्खाएवेत्यर्थः एवंतेषामत्तत्वेनभजनमभिप्रेतं सामर्थ्यवंतोज्ञात्वापियेनभजंतितेतथेति निर्दयाइत्याह गुर्वि
ति एवंतासांमतेश्रीभगवतोविचित्रक्रीडया आत्मारामता आत्मकामताचनघटतेतेव गुरुशब्दप्रयोगेणगुरुधु
क्राचनत्रेया विरहार्त्तिदत्वेनभजनासिध्याप्रथमपक्षद्वयंचनसंगच्छेत ततोकृतज्ञत्वेनैवपरिशिष्यतेति तथा
चार्येवच्यते अकृतचेताइत्यादि श्रीविष्णुपुराणे श्रीबलदेवयानेच अकृतज्ञाध्वजे हंसइति अतएवतैरुक्तिव्या
रव्यातं अकृतज्ञत्वंतद्वचनेनैवेति चरमकोटिगतिमिति तत्रापिचरमकोटित्वंघटतेतेव यद्वा गुरुधुकृपदेनपदार्थानपे
क्षयालक्षणयैवतैरतिकठिनइति व्याख्यातं तत्रैवचरमकोटिगतत्वंसुसंगतमेवनतुशब्देभिन्नोपक्रमे आत्म
रामत्वादिचातुर्विध्यारहितोप्यहंनजजामि नञः सर्वोसेप्रयोगः स्ववाक्येनैवस्वस्मयंत्रणेपत्यापरमवेयोगत्पात्

हे सख्य इति आत्मत्यादिराहित्यमेव साधितं अन्यथा सख्यासंभवः जेतृत्वनिवृत्तिविचारविशेषराहित्यमाभिप्रेतं अन्यथास्व
त एवानुवृत्तिसिद्धिः ननु अस्माकं त्वय्यनुवृत्तिः सदानुवर्त्तत एवेति चेत्सत्यं विशेषणं तत्संपत्स्यर्थमिति स दृष्टांतमाह
पथ्येति विशेषतो नष्ट इति पुनः प्राप्तिसंभावनानिरस्ता अत एव नितरां भक्तो व्याप्तः एवमित्यस्यानुवृत्त्य इत्यनेनान्वयः हे
अबला इति तत्र स्वतः शक्त्यभावं सूचयति पथ्ये पथ्यादित्यस्मोत्पत्स्रियत्वेन ममतिरोधानाद्यपराधो न ग्राह्य इति भावः अन्य
नैर्व्यीरख्यातं यद्वा एवमित्यस्य मयेत्यनेनान्वयः तादृशाश्चिंतानिभृत्तेन मयेत्यर्थः तत्र हेतुः मदर्थेति अत एव परो
क्षमपि भजते वधूभ्रमात्सापंश एव तागुणगायत्ताभावविशेषयुष्माकं स्मारताकेलमेतर्हि नमात्रेणात्रैव स्थितामित्यर्थः
अथवा अनुवृत्तिवृत्तये इत्युक्तं सा वक्ती दृश्यनुवृत्तिस्तां दृष्टांतेनाह पथ्येति अतो स्यपूर्वेणैव संवेधः हे सख्य इत्यनेन न इ
त्वयुष्मानधिकृत्यनोच्यते सहज सख्यादिति व्यंजितमेवाभिव्यंजयाति एवमिति हि अपि युष्माकमपि मय्यनुवृत्त
ये किं अपि तु नैव कृतः एवं तादृशा चिंतानिभृतया मदर्थमेव नान्यत् किंचिद् दृश्यपउकृत्ता उपेक्षिता लोकाश्चतुर्द
शभुवनानि श्रीवैकुंठादपि अतो वेदास्तु तद्बोधितकर्मनादरात् अत एव स्वाश्रयपतिपुत्रादयो याभिस्त्य
क्ताः स्वत एव माप्यनिरंतरविमुक्तसरमानुवृत्तिवृत्तेरित्यर्थः एवं मुमुक्षुभ्यो मुक्तेभ्यः स्वभक्तेभ्योप्यासां विशेषोदष्टितः १०।
तेषां तत्तदपेक्षासंभवात् तादृश्यभावाभावाच्च ननु नर्हि किमर्थमधुनैवांतर्हितः तत्राह मयेति परोक्षं भजते इति कुत्रापि

३७

मयानुगतमासीत् किंतु युष्मदंतिके नैव वर्त्तमानेन परोक्षं मद्गोचरधिया युष्माभिः क्रियमाणं विचित्रप्रेमालापादिकं भजता
हे तां शृण्वतैवास्मीत्यर्थः एवं कितवयोषितः कस्त्यजेदित्यादि परिहृतं यद्वा अपरोक्षं साक्षादेव भजतां तिरोहितं युष्मद्दृ
ष्टिमात्रेणास्थितं तथापि प्रियजनदुःखहेतुत्वेन दोषः स्यादेवेति चेत्तहि तत्र हितत्वमित्याशयेनाह प्रियं प्रिया इति यद्यननुक्तदपि
किमर्थं तत्राह प्रियं प्रिया इति प्रियाभिः सह प्रियस्य एतत्कृत्यमेवेति भावः यद्वा तत्परोक्षभजने प्रियं प्रियस्य तं मां सहज
मत्कौतुकरसेनेत्यर्थः अहो वतेदं साधककौतुकं यत् प्रियजनप्राणैः सहक्रीडनमिति चेत् तत्राह प्रिया इति प्रेम्णा तदपि
प्रीतिविशेषायैव स्यादित्यर्थः यद्वा तत्तथापि माशब्दद्वयं निषेधे प्रकृतमर्थं गमयति अर्हे इत्यर्थः कुतः प्रियं प्रियाः प्र
यस्य प्रियासु तथाकर्तुमयुक्तत्वादित्यर्थः एतच्चानुनयनचातुर्यं अन्यत्तत्तत्र समालोचयति संबोधमात्रेण वा युष्मा
यस्य प्रियासु तथाकर्तुमयुक्तत्वादित्यर्थः एतच्चानुनयनचातुर्यं यद्वा वो युष्माकं यत्स्वीयं असाधारणं
न्प्रतीत्यर्थः स्वसाधककृत्यं स्वीयं प्रत्युपकारकृत्येन न पारये कर्तुं न शक्नोमि निरवद्यासर्वनैरपेक्ष्येण सर्वोपाधिराहित्येन निर्मलप्रेमविशेषेण च निर्दोषा
साधकत्वं न दह्यं न पारये तत्र हेतुः निरवद्या सर्वनैरपेक्ष्येण सर्वोपाधिराहित्ये निरवद्यसंयोगहेतुत्वात् किंच यद
संयुक्तसंयोगः सम्यगमद्विषयकता दृशाकामस्य महतानेव गुणेनाभिप्रेतः निरवद्यसंयोगहेतुत्वात् तदर्थं कृत्यानि निश्चितान्येवं शृंखलाः कृ
ति दुर्जरा अच्छेद्या अपि गेहशृंखला गेहानि गेहसंबंधिपतिपुत्रादयस्तान्

त्रितामपि बंधहेतुत्वात् ताः संवृश्च्य भजन् भवत्य इति प्रेमगौरवेण अतो मम तादृशात् तादृशलाभाभावात् न पारये इत्यर्थः अन्यैर्व्याख्या
तं यद्वा सुसुष्ठु असाधुकृत्यं मद्विषयकं नैष्ठुर्यादिकमपि किमुत साधुकृत्यमित्यर्थः इदं च ताभिः सह स्वच्छंदेन
10२ सदा क्रीडालोभेनोक्तं अपारणे हेतुः निरवद्यनिर्जोग आत्मानं वा संयुजे इति समर्पयंति इति तथा तासां किंच दुर्ज
राः गेहशृंखलाः नित्य गोपालनादि दृढकृत्यनिबंधात् सर्वबंधजनानुवृत्तिबंधो अश्रु संवृश्च्य या भवतीः अहं माभ
जन्न सेवितवानस्मि शृंखलामिति पाठे चैतदेवार्थः दुर्जरेति विशेषणेन शृंखलारूपकेण च निजशक्त्या परिच्छेद्य
त्वं संघद्देन च आसक्ति किंचित् त्यागे पि वह्निस्त्यागासामर्थ्यं किं वा संछेदनेच्छायामपि सत्याश्रसामर्थ्यं ध्वनि
तं युष्माकं हृदात्मार्पणेन सर्वनैरपेक्ष्यभजनेन न च प्रत्युपकाराशक्तेः अत एव ये यथा मां प्रपद्यंते तांस्तथैव भजा
म्यहमित्यादि निजवचनव्यभिचारापत्तेश्चाहं युष्माकमृण्येवेत्यर्थः इति सर्वथा प्रत्युपकारासामर्थ्योक्तिः अये
चक्षणेयकलहाध्यायांते श्रीरुक्मिण्यै प्रत्ययमेव वक्ष्यति वयं प्रतिनंदयामहे इति अत्र च प्रतिनंदनोप्यशक्त्या
केवलमृणित्वमेवापादयन् अतस्तस्याः सकाशादस्यासां विशेषः प्रसिद्ध एवेति निजोच्छिष्टप्रसादस्य
प्रदानेन सदानुं प्रवृद्धं विधत्ते यस्तस्मै श्रीधरस्वामिने नमः इति श्रीदशमे द्वात्रिंशः ॥ ३२ ॥ रासली
लाभ यस्यैषा जगदेकमनोहरा यया श्रीव्रजदेवीनां श्रियोपि महिमाधिकः इत्थं ईदृशी भगवतः तादृशाव १०२

चनादिना निजाशेषभगवत्तां प्रकटयतः अतः सुपेशलाः परममनोहराः विरहः भूतो भावी तज्जंतापदाहज्वरः पू
र्वमुक्तस्याप्यस्यात्र पुनरुक्तिः विरहेप्यपरित्यजनात् तया विशेषतो निजत्वाणत्वादि प्रतिपादनेन पुनर्विच्छेदस
मननाद्बाधकनैव सस्पर्शापि तत्यागविवक्षया यतो गोप्यः सहजप्रेमरसपरिप्लुतचित्ता इत्यर्थः किंच तदंगेति आलिंगन
करग्रहणादिना संपन्नमनोरथाः सत्यः यद्वा भगवत एव विशेषणं सुपेशलत्वाद्येनुलेन तासां गोपीनां अंगेरूपचिंता
शेषइति अतएव रासक्रीडामारभत आसनं विस्तरयन्नुत्तिष्ठन् गोविंद इति श्रीगोकुलेंद्रतया तत्र निजाशेषैश्वर्यवि
शेषप्रकटनेपरमप्रकर्षोत्तमत्ता स्त्रीरत्नैरिति तासां च सर्वस्त्रीवर्गश्रेष्ठता प्रोक्ता इति रासक्रीडायाः परमसामग्री
दर्शिता तामेव प्रपंचयति अनुव्रतैस्तदनुकूलैस्तत्सदृशाकलाभिज्ञैरित्यर्थः अतएव प्रीतैः उल्लसितैः यद्वा तत्प्रे
मभरविवशैः अतोनुव्रतैस्तदेकाधीनैः अत एवान्योन्यमाबद्धबाहुभिः बाहवो वेव कराज्ञेयाः अन्यथा तत्स्यादि
सौंदर्यसंपत्तिः अन्योन्यत्वं च तासामेव ननु तेन सह तद्वक्तुं भगवतासां प्रत्येकमुभयतः कंठग्रहणात् एतच्च
रासक्रीडालक्षणं तथाचोक्तं नटैर्गृहीतकंठीनामन्योन्यात्तकरश्रियां नर्तकीनां भवेद्रासो मंडलीभूय नर्त
नमिति अयमस्मिन्मंडलीमध्ये ऽत्रैवास्तां न च नितः स रचितिआवरित्यादिशब्दग्रहणाभिप्रायः रासः परमरसकदं
बमय इति श्लोकार्थः सएवोत्सवः क्रीडाविशेषरूपं पर्वसुखविशेषसाधनसारसमुच्चयो वा तस्सेन परमानं

दघनमूर्त्तिना हेतुना सम्यक्प्रवृत्तः इति संप्रवृत्तो रासस्य कर्तृत्वनिर्देशेन प्राधान्योक्त्या स्वस्य सर्वतो वैशिष्ट्यं ज्ञेयं सम्प
कूलमेव दर्शयति गोपीनां मंडलेन मंडित इति तद्विधिः षष्ठोक्तः श्रीपराशरेण रासमंडलीबंधोपि कृष्णपार्श्वमनुग
103 ता गोपीजनेन नैव कृत एकस्थानस्थिरात्मना हस्तेन प्रगृह्य चैकैकां गोपिकां रासमंडले चकार तत्करस्पर्शनिमीलितदृशं
हरिः ततः प्रववृते रासश्चलद्वलयनिःस्वनः अनुयातशरत्काव्यगेयगीतिरनुक्रमादिति किंच तासामिति
तथा चोक्तं श्रीबिल्वमंगलेन अंगनामंगनामंतरा माधवो माधवं माधवं चांतरेणांगना इत्थमाकल्पिते मंडले मध्य
गः संजगौ वेणुना देवकीनंदन इति एतदनुसारेण सर्वमध्यमीभूतः शंकुस्थानीय एको बोधव्यः अन्यथा मंडले पा
र्श्वद्वयस्थगोपीद्वयकंठग्रहणेन वेणुधारणासिद्धा रासमहोत्सवे परमरमणीयमधुरमोहनतद्धर्माभावापत्तिः तदपि
प्रायेणैव वक्ष्यते मध्ये मणीनामित्यादि स्त्रिय इति स्त्रीसत्पुरुषस्य तथैकाकुलत्वं युक्तमिति बोधयति अन्यथा वैषम्ये
ण दोषापत्तिः सुखभंगश्चेत्यर्थः एकस्यैव तथा प्रवेशः सर्वासां च प्रत्येकं युगपत्कंठग्रहणं तथापि तासां स्वनिकटत्वे
मननं तत्र च पार्श्वद्वये वर्त्तमानस्यापेक्षत्वे नैव मानः तत्र कंचित्तत्तदलक्षितमित्याद्यशेषासमंजसं समाधत्ते आह
योगः अचिंत्याद्भुतशक्तिविशेषस्तस्येश्वरेणेति द्यौराकाशं तदोको निवासो येषां इति स्वभावत एव व्योम्नि स्थिता मे
कस्माद्रासक्रीडादर्शनात्संहृत्य स्थितानामित्यर्थः अत एव विमानशतसंकुलं नभो बभूव यद्वा द्यौः स्वर्गः तत १२
श्च स्वर्गापि तादृशोत्सवासद्भावः तेषां स्वस्वस्त्रीमायावरोधवशतोपि सूचितः अत एवात्सोत्सुका इति इत्यसमये

प्यागमनदोषः परिहृतः अथवा एतेरवलुश्रीभगवत्क्रीडायां अंतरिताः परिकरादेर्विशेषाद्देयाः अतएवैकं
दिवौकसां तत्क्रीडोपकरणत्वेन सदासावधानं व्योम्न्येव वर्त्तमानानामित्यर्थः एवमन्यत्राप्यमूहं ततस्तेभ्यो दिवौको
भ्यः किं वानंदनं तरं स्वयमेव नेदुः दिव्यत्वात् महामंगलोत्सवस्यावाद्या एवमग्रेपि आदिदुंदुभीनां नादो मंगला
रंभार्थं स्वस्ववर्ग्यसंमेलनार्थं चनित्तरां वेमुः निशब्देन नृष्टूपर इति व कृत्वेन चरंगस्य स्वांपुष्पास्तरां निकिलना
तमितिबोध्यते गंधर्वाणांपतयः श्रेष्ठाः अन्यथा तादृशनृत्ययोग्यगानासिद्धिः तेषांश्रेष्ठस साफल्यासंपत्तिश्च सौ
भिरप्सरोभिः स्वपत्नीभिर्वा सहिता इति सर्वेषामेव तदेकनिष्ठतोक्ता नतिष्ठति मलो यस्मादिति अमलं इति ते
षामपि कामादिदोषो निरस्तः एवं देव कृतोत्सवमुक्ता रासे योग्यं वात्तगीतादि वक्तुमादौ वाद्यमाह वलयानामि
ति किंकिणीनां कांच्यादिवार्त्तिनीनां घोषिणामित्तियो बित्वेन सामान्यत एव वलयादिसज्ञावोनत्तु साथे भूष
णत्वेन ग्रहणादिति बोध्यते पूर्वं गृहेभ्यो निर्गमे तासां तदनपेक्षणात् स प्रयाणेति तिता सां प्रीस्पर्धेता वल
भिवगतस्य श्रीभगवतोपि त्तावद्वलयादिशब्दो भवेत् रासेनयन्मंडलं मंडलीबंधः किं वा रसस्य पदं रासस्य यन्मं
डलं तस्मिन् यद्वा रससमूहमित्यर्थः भगवान्सर्वैश्वर्यशोभाभरसंपन्नोपि तत्र रासमंडले अत्यंतमुशुशुभे स्व
तो शोभा प्रशोभाच रमकावांगतस्यापि ताभिः शोभातिशयं पूर्ववद्वृक्षांतेन साधयति मध्ये इति हेमानां हेमानि

र्मितानां हेमवर्णानां वा यथा महामरकतमणेरपि हेममणिमध्यवर्त्तितयैव शोभाधिक्यं स्यात् तथापि तस्यापि पृथग्जनाक्षे
पेणैवाधिकाशोभास्यादित्यर्थः तत्र हेतुः देवकीसुत इति प्रेमविलासार्थं देवक्यां जातत्वात् पृथग्जनविषयकप्रेमभ
104 रविस्तारणेनैव शोभाभरसंपत्तेरिति भावः देवकी यशोदेति पूर्वं लिखितमेव अन्यत्तैर्लिखितं यद्वा महामरकत
इत्येकत्वं वस्तुतो भगवत एकत्वस्यापि किं वा वेणुवादनार्थं मध्यवर्त्तिनोभिप्रायेण अन्ये केचिदाहुः स्वभावेनेन्द्रनी
लमणिवर्णे प्यसौन्दर्यगतिकौशलेन युगपदिव प्रत्येकं कंठग्रहणादिना तोः सर्वव्याप्यभ्रमणात् तासां सुहे
मगौरिणीनां कांतिच्छटासंपर्कादन्तर्निरूपामलमरकतमणिवर्णतां जात्या महामरकत इत्युक्तमिति ततश्चान्यत्र
शक्तिविशेषएव न तु कोपि भगवत्ता विशेष इति न केवलं ताभिः सोधिकं शुशुभे किं तु तेन ताश्च शुशुभिरेइत्याह
पादेति पद्यानां न्यासः नृत्यगतिभिर्भूम्याक्रमणेऽगयस्तैः भुजानां हस्तानां विक्षेपेण धृतिभिः हस्तकभेदनवा
कस्यचित् धर्तु माक्ष्य त्वपरित्यागे नैव यद्वा अन्योन्यावद्धानामपि भुजानां नृत्यगतिभंग्येव त्ताबोद्धव्याः एवमग्रे
पिसर्वत्र तथैव ज्ञेयमिति स्मितसहितैः भ्रूवाविलासैः तत्र ह्रासाभिव्यंजकनर्त्तनचातुर्यैः भज्यमानैः स्वभावतः
कार्श्येन विशेषतश्च नृत्यार्थपरिवर्त्तादिना भंगमिव गच्छद्भिर्मध्यभागैः पटाः भगवद्दत्त्यानेसत्तिपुनः परिग १०४

हीतापि निज निजोत्तरीयाल्येव कृष्णस्य श्यामसुंदरस्य वध्वः तदाश्लिष्टांगो रंगस्तदेकाश्रया इत्यर्थः तत्र दृष्टांतेनापि वैध्यं
जितमेव किं वा कृष्णस्य वध्वः यया ः इति तत्सदृशात तच्छेदग्धादिकं तत्प्रेममोहितत्वे च युक्तमेवेति भावः अतस्तमेव गा
यंत्यः तत्प्रकारश्चोक्तः श्रीपराशरेण कृष्णः शरच्चंद्रमसं कौमुदीं कुमुदाकरं जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः
पुनरिति विशेषणेन रजुः प्रश्नोभतं तत्प्रेमभरमोग्ध्ययोरत्योत्पसंविलने न तस्यैश्वर्य लौकिकत्वयोरैक्येनेव शो
भाभरसंपत्तेः न वितडवेति दृष्टांतेनान्योन्यशोभया तस्यापि शोभाधुनितेव चक्र इति न्रत्तिगति कौशलेन निजशक्ति
विशेषैणैव नानात्वमिव प्राप्तत्वात् किं वा मेघानां घटादिवत्स्यप अन्यथा मुख्यामत्वाभावे शोभाद्यभावः
तस्यातिशोभानंतरं तासामतिशोभावर्णनं सर्वथा परमशोभा चरमकाष्ठागतानमेपि रासक्रीडाया शोभाविशेष
संपत्या परमाद्भुतत्वात् न तत्र प्रहर्षेंद्र केण तासां नृत्तगीत विषयं किं वा नृत्यस्य प्राधान्यमुक्त्वा गानस्याप्याह
उच्चैरिति नृत्यमाना इति नर्तनेपि तादृशगानात्कौशलविशेषं दर्शितः गानादिप्रयोजनमाह रतिसुरतं प्रे
मवा किं वा श्रीकृष्णप्रेमसेवयाया यासां न चोच्चैर्गानादिना तासां श्रमः शंकनीय इत्याह कृष्णस्य चित्ता
कर्षकस्य परमानंदघनमूर्त्ते वा स्पर्शमर्शेन मुदिता इति गीतस्योच्चैस्त्वं दर्शयति यासां येन वा गीतेन आ
वृत्तं व्याप्तं यद्वा यस्य गीतादेर्गीतेन लोकत्रिकं माधादिना आवृत्तं तदेकरसमयमभूदित्यर्थः इति

तन्माहात्म्यमुक्तं अन्यत्तैर्व्याख्यातं यद्वा तत्तेनमानः श्रीकृष्णेनसंमानः यद्वा तत्तेनमानः कृष्णादप्याधिक्येनगर्वी
यासांताः एकैकंमि प्रेमस्निग्धकंठः इतिगानस्यप्रेमसमयत्वेनपरममधुरत्वमुक्तं उच्चैर्गानेहेतुः रतीतिकृ
105 ष्णेतिचेत् यद्वाउच्चैः श्रीकृष्णादप्युच्चतया तथाचोक्तं श्रीपराशरेण रासगेयंजगौकृष्णोयावत्तारायतध्वनिः सा
धुकृष्णेति कृष्णेतितावत्ताद्विगुणंजगुरिति तत्रहेतुमाह एकैकस्मादिविप्रोषधौघ्निभिः एषांपद्यैषं हेतु हेतुमद्भाव
त्रेयं यद्यपितासामभिमर्शितस्तस्यापिमोदास्तथैवोच्चैर्गानंसंभवेत् तथापिरासगेयापेक्षयातदुच्चगीत
श्रवणेलालसेनवा नताद्दृक्सिद्धेदिति अधुनापूर्ववत्तासुमुख्यानांप्रेमचेष्टितानि पृथक्त्वेनाह का
चिदितिसार्द्धपंचभिः मुकुंदेनपरमानंदपदेनस[illegible]मति ताद्दृशोन्नयनेहेतुः तथातेनतस्यूज्जगताऽपि
परमानंदप्रदत्वंध्वनि उन्निन्येमूर्छयामास यद्वा अपूर्वाः कल्पयामास अमिश्रिताः ततस्तेनमुकुंदे
नपूजितातेनसममुन्नयनेपि अमिश्रितत्वेनोन्नयनात् कथंपूजितातदाह साधुसाध्विति वीप्साहर्षेसाधु
त्वप्रशंसायवावदितेतशेषः अन्यत्तैर्व्याख्यातं यद्वा अमिश्रिताः विशुद्धाः तथाचसंगीतसारे जातयो
ऽष्टादशप्रोक्तास्तासांलक्षणमुच्यते शुद्धाः स्युर्जातयः सप्ततः षड्जादिस्वराभिधाः ताएवविकृताः स १०५

त्पोज्जातः विकृतसंज्ञया इत्यादि किंच षड्जार्षभी च गांधारी मध्यमा पंचमी तथा धैवती चाथ नैषादी शुद्धा एतास्तज्ज्ञा
तयइति कांचिदित्यनुवर्त्तन एव बहु यथा स्यात् इति पूर्वतोप्यस्याः सामानाधिकं तेन च गानेपि कौशलमधिकं सूचि
तं पार्श्वस्थस्पेतिशीघ्रसुखग्रहणं बोधितं अन्यथा रासावेशेन स्खलनं संभवेत् किंच पार्श्वस्थत्वेन तस्यापि तत्र सा
वधानत्वं तस्याः पूर्वतोपि भावाधिक्यं सूचितं अतः परिश्रमादिकं तत्पर्थे केवलं छलमेवेति ज्ञेयं रासश्रमेण करा
घ्रविमेकं लीलया गदामिवावष्टभ्य बिभर्तीति गदाभृत् यद्वा गदेत्तिवर्णात्मकं शब्दं निगदती गदा वेणुः तां बिभर्ति
गदाभृत् वेणुधरः तस्य सखी करं परित्यज्य तस्य स्कंधं जग्राह परिश्रांत लक्षणं स्पृधादिति तथा श्रीपराशरे
णाप्युक्तं परिवर्त्तश्रमेणैका चलद्वलयलापिनी ददौ बाहुलतां स्कंधे गोपी मधुनिघातिन इति मल्लिकापुष्प
णं सूयनं कवराद्धो द्भवं एकागोपी श्रेसग तत्स्कंधस्थितं स्वभावत एव चोत्पलपुष्पतोप्यधिकं सौरभं यस्य वि
शेषतश्च चंदनेन श्रासम्यक् भक्तिच्छेदादिसाधकप्रकारेण लिप्तं इति भावो हि पनत्वं सूचितं हस्यपं भुवने हेतुः
हृष्टरोमेति प्रेमवैवश्यादित्यर्थः श्रुवेण रोमाणि पविहृष्टानि तस्याश्च हर्षः किं वक्तव्य इत्यर्थः षष्ठी चतुर्थ्यां
स्वगंडं श्रीकृष्णगंडे नाधेनश्रमव्याजेन संदधात्या इति भावः प्रकर्षेण संमुरयतां भावेपि तत्सुखस्पर्शरानादि
चानुर्येणादात् नृत्यतीन् त्संती इयमेका गायती गायंती च परा इति द्वेते ये कूजाः इति नृत्यगाने च परसावेशं

बोधयति पार्श्वस्थस्य भुजस्य निक्षेपेन ता॰त्पार्श्वे एवास्थितस्य भगवतो हस्त एव श्रीकुचतापहारित्वादिना तत्र श्रांतास
तीश्रमनिवृत्त्यर्थमिवेत्यर्थः एतच्च पूर्वमुक्तमेव शिवं स्वतः सुखरूपं एवं मुख्याः सप्राक्ताः अष्टमी च काचित्सहि लस
द्बाकुंपरिरम्य चुचुंबवत्त गोपीगीत स्तूति भाजन निपुणं मधुसूदनमिति श्रीपराशरेणोक्ता ज्ञेया यद्वा नृत्यती गायतीसे
१०६ कैव एवं षट् देव मंडलमध्यवर्त्तिनः पार्श्वद्वये स्थिते श्रीराधा ललितेनोक्ते प्रायोत्र मंडलस्यैवोक्तत्वात् यद्वा पूर्वव्याख्यानु
सारे एसप्तैवोक्ता ज्ञेयाः श्रीराधादे क्वें कांतस्य मंडलमध्यवर्त्तिनः सर्व पार्श्वपार्श्वस्था त्र नोक्तेति अच्युतं कस्माच्चिदपि रूपगु
णादि माहात्म्या च्युतिरहितं सुस्थिरं वा कांतं रमणं लब्धा तस्य दुर्लभत्वमाह कुः स्त्रियए कांतेन एक निष्ठया वल्लभं यद्वा प्रियः को
तं आत्मनः स्वे कांत वल्लभं लब्धा इति स्त्रियो पि सकाशात्तासां माहात्म्यमभिप्रेतं तदेव दर्शयति गृहीतेति तथा च गास्यते
श्रीमदुद्धवेन नायं श्रियोंग उ नितांतरतेः प्रसादः स्वर्योषितां नलिनगंधरुचां कुतोन्याः रासोत्सवेस्य भुजदंड गृहीतकं
ठलब्धाशिषां य उदगाद्व्रजवल्लवीनामित्यादि कस्मैतितासां रासेन परमा शोभोक्ता यद्वा परिश्रांतिः सूचिता तथापि न
त्येहेतुमाह भगवतानिजांशे षेश्वर्य सारसर्वस्वं च प्रकटयातासम मिति तत्साहित्यस्य परममोहनत्वात् यतो गोप्यः तदे
कप्रेमपरवश्यं दूत्यर्थः तेनसमित्येनतासां तत्सदृशवैदग्ध्यादिकमपि व्यंजितं तथा तासामि वृत्तस्यापि कर्णोत्पला
दिकं सर्वं बोध्यते अन्यत्तैर्व्याख्यातं तत्र वादके षितिदुंदुभिनादाभिप्रायेण किं नरादिष्वितिचादिवोकसामित्युक्तेस्तदं १०६

नर्गतत्वसंभावनयेति अथउक्तंश्रीतोप्यधिकंमाहात्म्यमेवदर्शयति किंवा पूर्वंगंधर्वपतिगानादिकमुक्तं अधुनारासारंभेण
तासांन कदाचिदन्यतोगीताद्यपेक्षेत्याहकर्तेति अर्थः स एव परिष्वंगः गोपीनामाश्लेषः कराभिमर्शः तासामेवकरालभनं यद्वा स्वक
रेण तासामभिमर्शः स्तनादिस्पर्शनं स्निग्धेक्षणंतन्मुखादीनांसरसावलोकनं उद्दामविलासः नीवीश्लथनादिः हासस्त्वभ्रमा
कोद्रेकविलसितस्मितं रमायाईशः स्वामी इतिस्वामित्वेनतस्याः तादृशरस्ययोग्यता व्रजसुंदरीभिरितितासामेवतद्योग्यत्वमभि
प्रेतालक्ष्मीतोपिभाववैदग्ध्यविशेषात् तमेवदर्शयन् श्रीभगवतस्तासांचमिथः साम्यंदृष्टांतेनाहयथेति यथाप्रतिविंवेनसहार्भ
कस्यकापि वैशारद्यंनास्तितथाताभिः कृष्णस्येत्यर्थः अनेनश्रीभगवद्गतेरपिशोभासूचिता वैषम्येतदपत्तेरिति तथाता
साभिरितितस्यापिप्रेमविकारोज्ञेयः स्वचोक्तः श्रीपराशरेणगोपीकपोलसंश्लेषमभिपत्यहरेर्भुजौ पुलकोद्गमसस्याय स्वेदां
बुघनतांगतविति अन्यतेर्व्याख्यातं यद्वाप्रतिविंवेनविभ्रमोविलासोयस्यसोर्भकोयथातदेकनिष्ठः सन् अन्यात्किम
प्यजानन् रमतेतथायमपि यद्वाएवमुक्तप्रकारेणव्रजसुंदरीभिर्येपरिष्वंगादयस्तैस्ताभिः रेवसहरेमेसोपितादृशा
नेवपरिष्वंगादीनकरोदितिदृष्टांतेनाह यथेति अन्यत्समानं ततश्चतासामत्यंतानंदोजनीत्याह तदंगेति तस्यां
गैः संगः आलिंगनादिनामिलनंअंगसंगः आकुलेंद्रियत्वलक्षणमाह तदंगेतितस्यांगैः संगः आलिंगनादिनामिलनं
अंगसंगः आकुलेंद्रियत्वलक्षणमाह केशानित्यादिना दुकूलंपरिधानकौशेयवस्त्रंकुचपट्टिकांउत्तरीयं उत्तरीयांतस्य

सूक्ष्मवस्त्रंवा तद्वयमेववा व्रजस्त्रियइतिप्रेमभरविवशतयातादृशत्वंतासामुपपन्नमेवेतिभावः एवंतासामानंदाधिक्यसिद्धि
मेव अतएवप्रश्नाद्वः तच्चभवनाऽवबुध्यतेइत्याशयेनसंबोधयति हेकुरूद्वहेतिकृष्णस्यपरमानंदघनमूर्तेः जगन्मिताक
107 र्धकस्यवाविशेषेणपूर्वपूर्वतोऽसाधारण्येनक्रीडितंक्रीडाविशेषतः साक्षात्स्वेदादिद्वाराप्रीत्याईदितत्वा कृष्णेत्यनेनतद्धि
क्रीडितस्यासितादृशत्वमेवाभिप्रेतं खेचरादेवाद्यः तेषांस्त्रियः सर्वाअपि कामेनश्रीभगवद्विषयकेणार्दिताः पी
डिताः सत्यः विशेषेणसर्वविस्मरणादिनाअमुह्यन् श्रीकृष्णप्राप्तौनिजयोग्यत्वायोग्यत्वादिविचाररहितत्वेनविकलाश्चभ
वन् नवमींदशांप्राप्तवत्यःशशांकइतिआशयेनसहितस्य इत्यर्थः विस्मितोऽभूत् अदृष्टपूर्वत्वात् अन्यत्रैर्व्याख्यातं तत्रातिदीर्घी
स्विति चिरकालस्थैर्यद्वद्वकुलसुखक्रीडानांयथानिर्वधाल्पकालेननिर्वाहासिद्धिः अतएवाग्रेवक्ष्यमाणस्यब्रह्मरात्रइ
त्यस्यार्थे ब्रह्मणोऽनुयुगसहस्रपरिमितायांरात्रौगतायामिति केचिद्व्याचक्षते तदपिसंभवेदेवभगवच्छक्त्याशेषविरुद्धस्यस
माधानात् रात्रिस्थितिवकृत्वंचरात्रीरित्युक्तस्यनिशाइतिवक्ष्यमाणस्यचानुसारेणेति अथवा देवानांदेवीनांचसर्वेषामे
वक्रोमयानानांविमोहमाह खेचराः तास्त्रियश्च गणश्शाङ्कनतत्पन्नाः पराश्चतारकाः चकारात् सोपिसगणः
कामार्दितोव्यमुह्यदित्यर्थः अनेनवक्ष्यमाणरेतोनेभोलज्जादिनासंकोचोनिरस्तः सर्वेषामेवविमोहात् तत्र
शशांकस्यकामोभगवद्विषयकभावविशेषलक्षणः एवंरासक्रीडाया श्रीविषयकभाववर्द्धनत्वात् तत्रापि 1.9

ताभिः सह तत्रापि संर्पेत्ताभिः परमयोग्याभिर्व्रजसुंदरीभिरेवसुसिद्धः तद्योगप्रस्थाने श्रीव्रजेंद्रकिशोरेणानन्यभोगपरसायात्र तस्मे
पदनामिति अत एवारंभे पूर्वमुक्तं तत्र गोविंदः स्वीरतेरितिपरमफलमाह कृत्वेति द्वाभ्यां कृत्वेव इत्येकस्यापि शक्तिविशे
षेणानानात्वसत्पतापि स्मिद्धेव गोपयोषितः गोपद्रूत्पर्थः ततश्च काश्चिद्विवाहिताः काश्चित्कन्याश्चेति यद्वा गोपानां योषितो
भार्याः ततश्च कश्चित्तेषां पत्न्य एव काश्चित्कृतकात्यायिनीव्रताभगवन्निष्ठा अजातविवाहा अपि कथंचिद्भगवन्मायादि
नास्तैर्विवाहमननाज्ञार्यीत्वेन प्रतीता इतिन्नेयं एतच्च श्रीरूपेणालिखितेललितमाधवनाटकादौ व्यक्तमेवली
लयाश्रृंगाररसरवेलयाविचित्रसोरतचेष्टयावाररामरेमे भगवानितितत्र देवभगवत्तासारसर्वस्वप्रकटन
शेषविस्तारणाच्चेति तच्चाग्रे व्यक्तं भावि श्रीभागवतामृते विवृतमेव आत्मारामोपीत्युक्तार्थमेव तद्रमणं
चपृथक्पृथक् तत्रैवनिकटकुंजादिषु किं वारासस्थस्यामेवतत्तदलक्षितत्वेन एवं च पूर्ववदेश्वर्यमाधुर्यद्रष्टव्य
रतिः सुरतं सैव विहारस्तेन इति तत्ररसिकतासूचिताय द्वारतो विहारः विविधविदग्धचेष्टयातेनयः विदग्धप्रोमोम
णिः परमप्रीतो वाम्नीकुत्ल्नः श्रंतमेन परमसुखात्मकेन पाणिना प्रकर्षेणश्रमजन्य प्रस्वेदविंदूपसरणालकसंवरणा
दिनोज्वलयामास यतः करणः कृपालुः नच केवलमनयोनेष्वेवकारणेन किंतु परमप्रियत्वेनेत्याह प्रेम्णेति इति कारूण्य

विशेषोऽभिप्रेतः शांतमेनेति स्पर्शमात्रेणापि स्वभावतः परमसुखकरत्वं तत्र च प्रमार्ज्जनं तत्रापि कारुण्येन तत्रापि प्रेमणो
108 तिपरमसंतोषणमुक्तं अंगेति प्रेमसंबोधने एवमेकस्यैकेनैव पाणिना सर्व्वासां युगपद्वदनप्रमार्ज्जनादैश्वर्येण लौकिक
त्वेन च पूर्ववन्मधुरभगवत्तासारप्रकटनं एवमन्यत्रापि ततः प्रहृष्टा निजदेहादिना त्रिधा तस्य प्रहर्षसंजनया मम सुस्मिता
हगोप्य इति तत्र स्फुरदिति सौंदर्येण सुधितेति भावेन जगुरिति संकीर्तनेन ऋषभस्य पुरुषस्य श्रेष्ठस्य इति तस्य परम
वैदग्ध्यादिकमुक्तं तासामपि सिद्धिमेव अत एव तस्य मानंदधत्यः उरुप्रकर्षैः समार्जनं कुर्वत्यः यद्वा अहो मम धन्यत्व
मिस्येता दृशं तस्य गर्व्वमर्पयंत्यः ऋषभत्वात् तत्कृतानामपि श्रेष्ठत्वं सूचितं तदेव दर्शयति प्रणयानि साक्षात्सुखरूपा
णि सुखात्मकानि वा जगुः तत्र हेतुः तस्य कररुहैः स्पर्शात्मानेन तदानीमेव तेन क्रियमाणात् किं वा पूर्वकृतात्
यद्वा सुखमार्जने गंडेषु जातान् प्रकृष्टमोदो या सा तादृतिरित्यादि परिश्रांतानामपि गाने श्रमाभावो रासविश्रे
पश्चबोधितः ततः परमहृष्टस्य श्रीभगवतोऽपि प्रेमान्वेषितमाह ताभिरिति विभिः श्रमं तासामात्मनश्चापोहितुं अप
नेतुं तत्र च सच्चिदानंदघनमूर्तेः क्रीडया भावेशेन परमवैदग्ध्यादिसूचनार्थं प्रस्वेदकणिकादिना सौंदर्यप्रदर्शना
र्थं च श्रमः संभाव्य एव अंगसंगेत्यनेन पद्मिनीस्त्रीवर्गपूज्यपादानां तासामंगतः स्वाभाविकामोदसंचारोऽभिप्रेतः
किंच स्वकुचेति अत एवानुद्रुतः स्तकूकौंदीज्ञेया कुंदस्रजः कुलपतेरिति पूर्वोक्तेः परमसुभत्वेन कुंकुमरंजितत्वसंभवः 1.0

स्त्रक्संबंधित्वेन इदानीमलीनां तत्रास्थितियोग्यता तथा गंधर्वपतिसदृशा तात्तत्रतेषामेव गीतिश्चबोधिता एवं जलक्रीडायां
कामोद्दीपनसामग्री च दर्शिता सः परमविनोदी कार्यामुनं आविवेशा आशुतया प्राविशत् दृष्टांतो गजेंद्रस्य वक्त्रीभिर्गजीभिः
सहजलविहारास त्वया घृनुसारेण अन्यत्तैर्व्याख्यातं यद्वा गंधर्वपा गायनश्रेष्ठाः गंधर्वोमृगभेदेस्याद्गायनेदेवचरेति
चेतिविश्वः तेचत्ते अलघ्यश्चैतैः इतिजलक्रीडायोग्यमुत्तमगीतमुक्तं यद्वा काभिः श्रीभगवदंगसंगेन घृष्टस्तनजोयाः याश्च
निजकुचकुंकुमेन रंजितारत्सावेशेन सर्वांगेषु संघृक्ताः ताभिः आत एव तासां श्रममपनेतुं न केवलं तासामेव स्व
स्यापीत्याह श्रांत इति जलक्रीडामाह स इति परमकौतुकी अंभसि जलमध्ये इतस्ततः सर्वदिक्षु अलमतिशयेन
परितः सर्वांगेषु सिच्यमानोऽभसैव स्वयं स्वातंत्र्येण रेमे यद्वा स्वयमपि तथैव ताः सिंचन्नित्यर्थः युवति
भिरिति समत्तत्वं ताद्दृशसेकसामर्थ्यं च दर्शितं प्रहसतीभिः वक्रवीक्षणपरिहसंतीभिः नेमोत्सुकेन तस्य भंगावित
र्केण वा तस्य तु तेन प्रेममेव विवृद्धमित्याशयेनाह प्रेम्णा प्रेमरसेन उक्षितः सिक्तः स नृपाठांतरे प्रेम्णा ईक्षि
तो दृष्टः अंगेति प्रहर्षसंबोधने वैमानिकैः विमानेन चरद्भिर्देवादिभिः सर्वैरेव तत्र तु क्रीडापरिकररूपैः
कुसुमवर्षिभिः परमानंदेन वृष्टिं बद्धफुल्लपुष्पाणि क्षिपद्भिः सद्भिरीड्यमानः साधु साध्विति यद्वा तस्य भंगं वितर्को
वलवृत्त्यर्थाभिव्रजपजयस्येवं स्तूयमानः ततश्च वैमानिकैरिति पुंस्त्वेन पुरुषैरेव स्त्रीणां विमोहादिना तत्राशक्तेः

किंवा ता सां व्रजे देवी पदतया तित्वेन कुसुमवर्षादावप्रवृत्तेः अतः स्वयमित्यस्यात्रैव वान्वयः स स्वयमेकमेव तैः स्तू
यमानः अन्यत्तैर्व्यारव्यातं यद्वा स्वेषु जनजनने स्वैव रतिः रागो यस्य सः अतः स्वस्य जयादपि तासां जयेन संतोषर
109 तिभावः यद्वाननु श्रीगुरोः कृपयातज्जलक्रीडां विस्तार्य्य वर्ण्णयेति चेत्तत्राह स्वा असाधारणैरीतिः जलादिक्रीडाय
स्य सः अतो दृष्टांताद्यभावेन सा विस्तरेण वर्ण्णयितुं न शक्यते इत्यर्थः एवमग्रेतेवक्ष्यमाणात् तथा श्रीहरि
वंशोदिता च द्वारिकाजलविहारादप्यत्र विशेषः सूचितः गजेंद्रस्य लीलेव लीला यस्य सः पूर्वोक्ताभिप्रायमे
व यद्वा तादृश जलसेके पि गजेंद्रस्येव स्तुरवभरविवृद्धया यंदृष्टांतः ततो जलक्रीडानंतरमिति जलक्रीडया
पुष्पमालादेर्म्लानत्वादिना पुष्पावचयादिकौतुकार्थमित्येवमर्थः त्वर्थश्चकारोभिन्नोपक्रमे जलप्रसूनानिक
मलादीनि स्थलप्रसूनानि जाती कुंदादीनि तद्गंधसेवनेनाऽनिलस्य सौरभ्यं प्रोत्यं च कुर्वद्वितिमांद्यं च सूचितं
च चार पुष्पावचयनतत्साहित्येनैवागमनात् किंवा जलक्रीडया गरागापगमेन सहजमधुरसौरभ्यप्र
काशात् किंवा तेषां भावोद्दीपनस्वभावत्वेन सदा स्वीकारात् किंवा श्रीमुखवनमालाद्यामोदेन सदा
कृष्टत्वात् अतएव तेषां मुकुरुक्तिः मदच्युदिति भृंगगणवृतत्वे हेतुता तथाद्विरदस्येव ताकाममत्तता १०८
च सर्वत्रापेंद्र अतः प्रायो मत्तगजेंद्रस्य का अधिकतापाः यथा सदा गजीभिः सहस्वात्तंत्र्येण क्रीडायामिथः प्रीते

आपेक्षयेति अस्मै[...]व्याख्यातं यद्वा भगवत्कार्यं तु क्रीडालोलाः याः प्रमदास्तासां गणेनावृत इति तेषां प्रेममत्ततोक्ता
अत एव प्रमदेत्युक्तं एवं तत्रापि कृतरासक्रीडां मुक्ता तस्यामनुक्तमन्यमपि विलासं संगृह्णन् तथा[...]कृताया
मपि तस्यां तामत्ति दिशन्नुपसंहरति एवमिति उक्तप्रकारेणेति तद्रात्रावीदृशी परापि क्रीडा साचोत्पत्तविस्तीर्णं
त्याद्वर्णयितुं न शक्यत इति भावः तथा निशा इति वक्तृत्वेन तत्र च सर्वा इति साकल्येन संपूर्णकैशोरं सर्वास्वेव रात्रिषु
रासक्रीडा बोध्यते श्रीपराशरेणापि तदुक्तमेव सोपि कैशोरकवयइति तत्र च कौमारं पंचाब्दं तं पौगंडं दशमा
वधि कैशोरमापंचदशाद्यौवनं तु ततः परमित्यादिवचनाद् एकादशाब्दमारभ्य पंचदशाब्दपर्यंतं गोकुलेत्र नित्यं
सा क्रीडा यायच्चोक्तं श्रीमदुद्धवेन तृतीयस्कंधे एकादशसमास्तत्र गूढार्चिः सबलोवसदिति तत्र च कौमार
पौगंडयोस्तदयोग्यवयसो रासक्रीडानुदयेन भगवत्ताविशेषप्राकट्याभावात्कृतैश्वर्यत्वाभिप्रायेण अत एवो
क्तं गूढार्चिरिति अत एव रंगस्थलेपि तरो प्रति श्रीभगवतैव वक्ष्यते नास्मत्तो युवयोस्तातेत्यादि — च्चमथ
पुरीप्रवेशे वक्ष्यमाणस्य प्रगल्भलीलाहसितावलोकैरित्यादेरनुसारेण कैशोरे यौवनेपि श्रीभगवतो गोकुले क्री
डामन्यते तच्च नातीव संगतं कैशोरेपि तस्य वैदग्धीविशेषेण प्रगल्भलीलायाः संभवात् अन्यथा किशोरे प्रयाम
लम्बनं विप्रकृष्टः तथा किशोरोनाप्तयौवनावितिपुरनायुक्ते विरोधः स्यादिति किंच एवमित्यनेन तद्रात्रिक्रीडा

यादृशीश्रन्यरात्रिक्रीडापितादृश्येवेतिसूच्यते तत्तत्पूर्वरासक्रीडारंभेमिथोवाकोवाक्यस्यसमाधानंलिखितमेवेति शशां
कः पूर्णचंद्रः पूर्णत्वेनैवशशांकस्यसम्यगुदयात्तस्याशुचिर्विशेषणराजतादिनवत्प्रकाशिताः एवं श्रीभागवद्रासक्रीडा
र्थितासुरात्रिषुचंद्रः पूर्णिमायामिवपूर्णमंडलएवोदृच्छदितितत्रेयं यच्चोक्तंवैशंपायनेन एवं श्रीसकृष्णोगोपीनांचक्रवा
110 लैरलंकृतः शारदीषुसचंद्रासुनिशासुमुमुदेसुखीति तत्रचशारदीत्युपलक्षणं किंवाशारदीष्विवेतितत्रेयं य
थामथुरीमध्येश्रीवसुदेवकृतपुत्रपरिवर्त्तनादिवत् कल्पभेदव्यवस्थायाभेदः कल्पः ननुनित्यमेवतादृशरात्रौ
नादृशरात्रौप्रकारादिनाकथंसाक्रीडासिद्धेत्तत्राह सत्यकाम इति ननुतथापिमानादिनापत्यादिपारवश्यादि
नावासदातास्तस्यादुर्लभामन्ये तत्राह ननुनिरंतररतोऽनुरक्तैः सर्वथावरुध्यवंधेनसर्वापेक्षयावासेवद्धोऽवलानां
तदेकाधीनगोपीनांगणोयस्मिन्निति तासामनुरक्तत्वेनसामरस्यपद्यत्कुत्रापियदातदायेनकेनापिप्रकारेण
सिद्धेदेवेतिभावः तत्रचासंभावनास्तीत्याह सः महामोहनोरासरसिकइति नचकदाचित्कदाचित्केनापिहे
तुनातत्रत्यक्तिः स्यादित्याह अवरुद्धंस्वीकृतंसौरतंसुरतसमूहोलीलाविलासोद्रेकोवायेनसः तदर्थमेवेत्याक
सादित्यर्थः तच्चात्मन्येवेति नकेवलंस्वयमौदासीन्येन ताएवरमयामास किंतुस्वस्मिन्स्तादात्म्यस्वी
कारेणपरमात्मसत्तास्वयमप्यनुभूतवानित्यर्थः यद्वा आत्मनिमित्तेइत्यात्मारामत्वाद्यपेक्षयातस्याव 11.
तेनपरमानंदोव[illegible]तः नकेवलमुक्तप्रकारारासक्रीडैवकृता किंतुताभिः सहविचित्रप्रकारेण विचित्रा

रतिश्चकृत्ते त्याह शरदादेति शारदिकामस्यप्रावल्येन पुलिनोद्भसौंदर्य्यं गोक्तं यद्वा हायनोस्त्री शरत्समाइत्यमरोक्तेः संव
त्सरोक्तेः संवत्सरमध्ये यस्मिन्नृतौ मासे दिवसे वा याः कार्येषु कथा निरूप्यंते ताः सिद्धे वेतदर्थान् भीत्यानुस्थितवानित्यर्थः
तास्तु श्रीगीतगोविंदविदग्धमाधवनाटकाद्यक्तप्रकाराज्ञेयाः अन्यत्तैर्व्याख्यातं यद्वा एवं सिद्धेवइत्यरात्रिषु रासक्रीडा उक्ताः अधुना कदाचि
द्दिवसे पि तादृशीमन्यामपिक्रीडां सूचयति सर्वा इति शरत्काव्यकथास्तु सर्वाः सिद्धेवे तत्रकाव्यशब्देन परमवैचित्रीता सांसू
चिता तास्तु गीतगोविंदादि प्रसिद्धाः तथा श्रीचंडीदासादि दर्शितदानखंडादि प्रकारकास्तु ज्ञेयाः एवं श्रीति विशेषेण श्रीवा
दरायणेना वार्णितायाः श्रीरासक्रीडायाः श्रवणात्त्रियोर्पां[illegible]कूपणे नैविलोकनानामीषद्धहतां शुष्कतार्किकमीमांस
कादीनां केषांचिद्दैवे सवानामभिप्रायं वितर्क्य क्रिपयातेषामभिवदितार्थंतमुच्छाप्यदेहव्याजेन पृच्छति संस्थापनायेति
त्रिभिः सम्यक्स्थापनायचलुप्तस्य प्रवर्त्तनाय वर्त्तमानस्य च विधूतोरक्षणायेत्यर्थः न केवलं तदर्थमेव किंतु इतरस्य
अधर्मस्य प्रकृष्टशमाय सवासनोन्मूलनाय अन्यथाधर्मस्थापनस्याप्यासिद्धिः हिप्रसिद्धं संरक्षणाय धर्मस्येत्या
दिवचनेभ्यः भगवानिति ततएवभगवत्ताप्रकटनमपि स्यादिति भावः अंशेनश्रीबलदेवेनसह इति तत्र तत्राग्रहोपि
दर्शितः जगतामीश्वरः प्रतिपालकः अन्यथा जगन्नाशापत्तिरित्यर्थः स्वेषाम्भायं धर्मस्य भक्तिविरुद्धाशेषधर्मस्य संस्था
पनं नाशनं तस्मै प्रशमाया स्वंतनाशाय तादृशधर्मा[illegible]धर्माभावेनैव रासक्रीडादिमहालीलासिद्धालिज्ञावतारमुख्यप्रयोज

नासिद्धेः ननु स्वकृतवेदादिनिबंधातिक्रमः प्रायः स्यात् तत्राह जगतां ब्रह्मादीनामपीश्वरः परमस्वतंत्रोयं कदाचिद्रसविशेषापेक्षा
पेक्षया तादृशमपि कुर्यात् तत्रास्य को नाम नियामकोस्ति इत्यर्थः यद्वा धर्मो मद्भक्तिकृत प्रोक्त इत्यादिन्यायेन भक्तिलक्षणो धर्मस्तस्य
तरस्य तद्व्यतिरिक्ताशेषस्य मोक्षादेरपि अन्यतोपरमायणेनो जगत्परिपालकः विघ्नविनाशनपूर्वकेण भक्तेः सम्यक्स्था
पनेनैव सर्वेषां स्वतः सुखसर्वार्थसंपत्त्या जगत्पालनसिद्धेः धर्मा एव सेतवः लोकरक्षामर्यादाः धर्मे वैदिकनिबंधा वा ते
षां वक्ता त्वदेव कर्ता अन्यथा वाक्यव्यवहारयोर्विसंवादेन लोकेरग्राह्य स्यात् किंच अभितो रक्षितात् तत्प्रतिपक्षवधादिना बहु
धा संबर्धनेन च पालकः परदाराभिमर्शेन रूपं प्रतीपं धर्मसेतूनामिव धर्मसंस्थापनादेर्वा प्रतिकूलं ब्रह्मन् हे साक्षाद्वेद
मूर्ते प्रतीपाचरणेन वेदातिक्रमाद्भवादृशां विप्रकुलातिक्रमोपि स्यात् तच्च ब्रह्मण्यदेवस्य तस्यायुक्तमेवेति भावः यद्वा
नलुप्ताततकरणं मया त्रातुं शक्यतेमित्यर्थः अन्यत्तैर्व्याख्यातं यद्वा प्रतीपमाचरदिति अधर्मः उक्तः कृतोभिरक्षित
श्चेत्यर्थः तत्र उक्तः मया परोक्षं भजता तिरोहितमित्यादिना कुतः साक्षादेव रमणात् अभिरक्षितः पुनराचरणात्
तेन लोके प्रवृत्तिसंभवाच्चेति यद्वा धर्मः प्रकर्षेण नाशितः अधर्मस्तु सम्यक्स्थापित इति श्लेषपक्षे कथं केन प्रकारेण
चरन् उपितु न केनापीत्यर्थः कुतः भक्तिलक्षणधर्मसेतूनां वक्तृत्वादिहेतोरित्यर्थः अतो निजावतारसुखप्रयोज
नमोभाक्तिविशेष[illegible]रणाय धर्माघनादरो युक्त एवेति भावः सच तावत्कर्माणि कुर्वीतेत्यादिवचनात् तत्सेवके

ध्यपि वक्ता एव यत्र वेदप्रसिद्धधर्ममर्यादानां वक्तादिरपि किमर्थं प्रातिकूल्यमाचरत् रासक्रीडया परमभक्तिप्रवर्तनेन तदेक
साधकेऽधर्मस्यापि सफलत्वमिति भावः किंच पराणां तदेकभक्त्याश्रेष्ठानां दाराणां स्वस्त्रीणां द्वाभिमर्शनं प्रेमार्थं मल्पा
र्थमिति भावः किंच पराणां तदेकभक्त्याश्रेष्ठानां दाराणां स्वस्त्रीणां द्वाभिमर्शनं प्रेमार्थमवतीर्णस्य सर्वापेक्षयाप
यजनमनोरथपूरणं युक्तमेवेति यदुपतिर्धर्मपरस्य यदुवंशोऽवतीर्णत्वाद पित्तयाकर्तुं नार्हतीति भावः तेषु प्रसिद्धो एतन्नि
ति कुत्राप्यन्यः संशयो नास्तीत्यर्थः नइति वरुत्त्वसंदेहिवर्गाभिप्रायेण संशयमिति आप्तशिरोमुकुटमणेस्तस्य कृते दे
षबुद्धिर्नास्त्येव किंतु शास्त्रविरुद्धत्वेन तत्रास्माकं दार्ढ्याभावाच्चित्तदोलनं स्यादित्यर्थः सुव्रत हे ब्रह्मचर्यादिनिष्ठ इतिभावा
दृशमाचरितविरुद्धं तत्जुगुप्सितमिवेति यद्वा हे सदाचारनिष्ठेति अन्यथाभवदादिसंमतसदाचारलोपइतिभावः
श्लेषपदेयद्वनं भक्तानां पतिरिति भक्तवात्सल्येन धर्मातिक्रमार्होपिइत्यर्थः जुगुप्सिते किंकृतवान् अपितुनैव किंतु
भक्तवर्गसंमतमेवाकरोदित्यर्थः कुतः आप्तः लब्धः कामः रासक्रीडादिना निजप्रेमभक्तिविस्तारणमनोरथो येन
सः सर्वसाधनतमप्रेमभक्तिप्रवर्तनेन निंदिताना चरणात् वस्तुतस्तेन साधकवर्गसंतोषणादेवेत्यर्थः तथापि नः संशयं
छायइतितत्र केषांचिच्छास्त्रार्थतत्त्वविदां भक्तिपरायणानां तद्रसाभिज्ञानां प्रेमभक्तिरसमयतदीयरासक्रीडा
दौसंशयाभावात् यद्वा प्रायेणशानसमयेऽस्मिन्इति संशयस्यायोग्यतोक्ता अतः शीघ्रं तच्छेदनमभिप्रेतं नइ
तिस्वीयत्वेनविपक्षाणामपि ग्रहणं सहजविनयादिना किंवा वाक्चातुर्येण विपक्षतादिबोधनार्थमेव अतोदुर्व

क्षीनामेवात्मनां केषांचित् हितार्थमेव मयादृश्यते न च निजसंदेहादितिभावः ततः अभिक्र भयं यथा स्यात् तेभ्यो भयमकु
र्वातेषां संशयशंखवलां छिंधीत्यर्थः सुवृत्ताहे भक्तेकनिष्ठ सहजकृपालुतयापि ष्यस्नेहापेक्षया वापरिहरति धर्मेति सप्तभिः ईश्वरा
११२ णां ज्ञाने भक्तौ च सामर्थ्यवतां भगवद्भजनादिना कर्मादिपारतंत्र्यरहितानामित्यर्थः धर्मस्यव्यतिक्रमविशेषेणोल्लंघनं यथा
ब्रह्मादीनां दुहितृकामनादि साहसं निर्भयता यथा इंद्रादीनां सर्वभुक्के भक्षयति दहतीति वा तथा तस्य सर्वभोजने नापिय
थाग्नेरमेध्यादिभक्षणे जन्यदोषो वधादिदोषो वा न स्यात् तद्वदित्यर्थः अन्यत्तैर्व्याख्यातं यद्वा धर्मव्यतिक्रम एव साहसं
एतदीश्वराचरितं साहसं न सम्यगाचरेत् सम्यगित्यस्य निषेधेतात्पर्यं जातुकदाचिदपि तत्र च मनसापि किमुत वाचा
कर्मणा वा तर्हि हेतौ निश्चयेवा विशेषेण समूलतया लोकद्वयदुःखित्वादिप्रकारेण नश्यति मौढ्यात् ईश्वराणामैश्वर्यं
आत्मनश्चासामर्थ्यमज्ञात्वेत्यर्थः इति भक्षणे मौढ्यमेव हेतुरुक्तः अन्यथा भक्षणे प्रवृत्तिः अब्धिजं कालकूटं इति परमतीक्ष्णं
तया सद्य एव विनाशोभिप्रेतः ईश्वरस्तु न नश्येदेव प्रत्युत ऐश्वर्यविशेषप्रकाशादिना शोभत एव यथा नीलकंठत्वादिना
श्रीमहादेव इति भावः स्वकीयेन वचसा युक्तमिति स्वशब्देन कदाचित्प्रेमपारवश्येनाविचारादुच्यमानमाचारविसंवादिव
चो व्यवर्त्तितं बुद्धिमानिति तत्तद्वीर्यस्येत्यर्थः अन्यथा निर्बुद्धिरेवेति भावः कुशलं पुण्यं तत्स्याचरितेनानुष्ठानेन एषा
मीश्वराणां चकारादमुत्रापि अर्थः फलं विपर्ययेण पापेन वा शब्दः समुच्चये अनर्थोपि नास्ति कुतः निरहंकारि
णां अहंकारिभ्यः व्यतिरिक्तानां अहंकाराभावेन कर्मभिरलेपादित्यर्थः प्रभो हे वोढुं समर्थ एतत्त्रयासमं बुध्यत ११२

एवेत्यर्थः यद्वातस्यापीश[नी]त्वेवाभिप्रायेण संबोधयति हे ईश्वरेति अहो यद्येवं तेषामपि निरहंकारितामात्रेणैवानर्थाभावस्तर्हि सर्वजीवानामाधिभव
नीर्णस्य परमेश्वरस्य दु[…]र्थेशंकापीति कैमुतिकन्यायेन द्रढयन्नाह किमुत इति अखिलसत्वानां सर्वजीवानां तिर्यगादयः क्रमेण नामसराज
ससात्विकाः ईश्वीनत्वानां स्वभावत एव नियम्यानां इति मुक्तानामपि तद्दीक्षीनतास्मृचितांकुशालाकुशले पुण्यपापे तान्यामन्वयः संप
र्कः सर्वनियंतृत्वेन नियामकाभावात् परमस्वतंत्रत्वाच्च एतदेव हि परमेश्वरत्वंनामेतिभावः अन्यत्तैर्व्याख्यातं यद्वा ईश्वितव्यानां च
तद्भक्तानां किमुतेति परागेति अतिनम्रत्वेन सेवया भक्तिविशेषो दर्शितः नितरां सेवेति निशब्दः स्वभावत एव तेषां सेवायास्तत्र अभिप्रा
येण यद्वा परागेति दूरसेवाभिप्रेता निशब्देन च स्वस्वभावसेवाभिहिता तथापि तन्माहात्म्येन दृप्ताः निर्भयत्वादिदर्पयुक्ताः अत एव स्वैरं च
रंति विधिनिषेधानादरेण स्वेच्छयैव कृत्यानि कुर्वते अतोन नह्यमानाः तैरवह्यमानाः तत्रानासक्ते त्वप्राइतिपाठे सर्वत्रसंतुष्टाः अन
न्यापेक्षा इत्यर्थः किंच योगोपायाः समाधिज्ञानं वा तस्य प्रभावेन शक्त्या विशेषेण धृतः छिन्नः कर्मभिरनंतकोटिजन्मार्जितैर्बंधः बंधनं तद्रू
पो वा बंधो येस्ते मुनयोपि अपिशब्देन भक्तेभ्यो मुनीनां न्यूनतोक्ता अनेनैवार्थेन साभिप्रायेण दृप्ता इत्युक्तं इच्छया स्वच्छंदेनैव आत्तप्रकटि
तवपुर्येन तस्येति परमस्वातंत्र्यं दर्शितं यद्वा निजप्रेमभक्तिविस्तारणेच्छया ततश्च तदपेक्षया विधिनिषेधानादरो युक्त एवेतिभावः
यद्वा भक्तानां इच्छया आत्तानि वपूंषि मत्स्यकूर्मादिमूर्तयो येनेति अवितारित्वेन परमैश्वर्यमुक्तं अतः कुत एवंविधः अपि तु न कथम
पि स्यादित्यर्थः अन्यत्तैर्व्याख्यातं यद्वा योगोभक्तियोगस्तेन मुनयोपि किमुत प्रथमत एव भक्तिसंमत इत्यर्थः अप्यर्थे चकारः किंव
क्तव्यं पृथक् यत्नेन तेषां तासां चेति सर्वेषामपि तत्र संशयाय निरासार्थमेव शब्दः इत्यनेनास्यान्वयः स एवैष साक्षात्कृतः अध्यदङ्इतितदं
शत्वेन तत्स्वैर्यत्वेन वा तत्वविचारतस्तस्मिन्नेव भोक्तृत्वपर्यवसानात् किंवात्र तर्यामित्वेनापि मायावादिनामद्वैतव्याख्यानुसा
रेण च परदारत्वाभावात् परदारसेवा नास्तीति परिहृतं स्यात् एव परमात्मत्वसिद्ध्ये सर्वेषामित्युक्तं एषः श्रीगोपीरमणः क्री

उनेनलीलया किंवाक्रीडनेनहेतुनाक्रीडार्थमित्यर्थः देहभाकू निजश्रीमूर्त्तिप्रकटकः अन्यत्तेर्व्याख्यातं यद्वा अध्यक्षः सर्वचित्ता
धिवात्तासर्वेंद्रिप्रवर्त्तकश्चेत्यर्थः अतएवांतश्चरति एवमंतर्यामितयासर्वकर्मसुसर्वप्रवर्त्तनेनापियथातस्यतद्गुणदोषैर्लेपो
113 नास्यात् किंवासर्वकर्मस्वंतर्यामिद्दृष्टाप्रवृत्तेरन्येषामपितैर्लेपोयथानस्यात्तथात्रापीतिभावः इतिपरमैश्वर्येणपूर्वोक्तवंध
भावहेतुरभिव्यंजितः विशेषतश्चरासक्रीडार्थमेवदेहभाकूप्रकटितत्तद्योग्यश्रीव्रजेंद्रकिशोरमूर्त्तिरित्यर्थः प्रेमरसविस्तार
णार्थं भवतीत्यस्यतदनुरूपएवव्यवहारोयुक्तोनामेतिसिद्धांततत्वं एतदेवप्रपंचयिष्यति अनुग्रहायइति यद्वा अध्यक्षः प्रस
न्नः सन्क्रीडनायतत्क्रीडार्थं देहः अवतारोयेषांगोपीजनानांव्रजजनानांवातान्भजतिरमयतीतितथाहुः अतस्तेषामंतर्वहि
श्चतत्क्रीडासाधनत्वात्तत्क्रीडयाकस्यापिकोपिदोषः प्रसज्जेदितिभावः भक्तानामनुग्रहायमद्भक्तानांविनोदार्थंकरो
मिविधाः कृपाइत्यादिश्रीभगवद्वचनात् मानुषंनराकारं आश्रितः प्रकटितवान्सन् यद्वाप्रकटयामासेतिवाक्यसमाप्तिः इतिभ
क्तानुग्रहार्थंतत्क्रीडेत्यभिप्रेतं तत्रभक्तशब्देनश्रीव्रजदेव्योव्रजजनाश्चसर्वे तथाकालत्रयसंबंधिनश्चान्येचवैष्णवाः यद्वाभ
क्तानांमुख्याः श्रीव्रजदेव्यः एवोक्ताः तथापिमुख्यानामनुग्रहोन्येषामपिसर्वेषामनुग्रहः सिद्धएव अतएवक्रीडाभजते
प्रीत्यासंपादयतीत्यर्थः शेषेणभजते अनुसरतिप्रकाशयतिवतिक्रीडानांनित्यसिद्धत्वसूचितं तेनसर्वदोषः स्वतएवाप ११२
रस्तः तादृशीः अनिर्वचनीयाः सर्वचित्ताकर्षिणीरित्यर्थः श्रीशेषेणराजसदृशाक्रीडाश्रवणेनापितत्परोभवेत् किमुतता
सक्रीडाकृत्येत्यर्थः [illegible] भगवान्क्रीडावा सर्वोपिजनोभवेत् यद्वामानुषंदेहमाश्रितैः सर्वोपितु [illegible] तत्परोभवेत्

मर्त्यलोके श्रीभगवदवतार[illegible]यां भजनेनमुख्यत्वात्त्वमनुष्याणामेव सुखं तच्छ्रवणादिसिद्धेः भूतानामिति पाठे सर्वेषामेव जनानां विषयि[illegible]र्लभक्ता
नां चेत्यर्थः इतिपरमकारुणिकेनोक्तं एवं सकथं धर्मसेतूनामभिरक्षिते धर्मविरुद्धं कथं कृतवानित्येकस्य प्रश्नस्य परिहारः धर्मव्यतिक्रम इत्यादिभिः तथात्रा
त्रकाम इत्यनेन परिपूर्णस्यकात्तु अस्पृहेति द्वितीयस्य अनुग्रहायेत्यनेनेति विवेचनीयं तासुन्निवारणमतिक्रम्य गतास्वपि कृष्णं प्रत्यसूयां न च
क्रुः कुतस्तस्य मायया शक्तिविशेषेण मोहिताः यतो व्रजौकसः तल्लीलापरिकरा इत्यर्थः अत एव गतान पितान्स्वस्वपार्श्वस्थाने
वमन्यमाना बभूवुः यद्वा दारान्प्रति च नासूयन् कुतः स्वपार्श्वस्थान् मन्यमानाः तत्र च तावार्यमाणा इत्यनेन निजवाक्यमतिक्रम्य
साक्षात्कृता नामपि तासां तैः स्वपार्श्वस्थत्वमननं पुनर्निवृत्यागमनस्य मननादिति ज्ञेयं यद्वा भक्तानामनुग्रहायेत्युक्तं तत्र गोपानां दा
राकर्षणेन तस्मै तेषामसूयासंभवान् तेषु कथमनुग्रहः सिद्धिरित्याशंक्य तच्चोत्तरं वदन् प्रकृतं चानुसरन्नेनेति अर्थः स एव वासु
देवेन चित्ताधिष्ठात्रा तेनैव अनुमोदिताः अतः प्रेरिता अपि यद्वा वसुषु अर्थात् सुदीव्यतीति वसुदेवो वसुप्रवरो ज्ञो रूपः श्रीनंद एव तत्सु
त्रो वासुदेवस्तेन भगवत्ताप्रकटनपरेण श्रीकृष्णेन व्रजमंगलार्थमनुज्ञाताः किंवा अनु निरंतरं मोदिता हर्षिताः अत एवानिघ्नंस्यः
तथापि स्वगृहान् ययुः कुतः भगवत्प्रियाः तत्प्रीतिमालोच्येत्यर्थः अन्यथा तातमातृवयस्यवर्गसंततो षणगोपालनादेस्ताध्या
पूर्ववद्रासक्रीडासुखस्याचासंपत्तिः व्रजेयावध्वः नवोढा इव नवयुवत्यः यद्वा रासक्रीडयातत्पत्नीत्वमिव प्राप्तास्ताभिः इदं रास
क्रीडालक्षणं विशिष्टं क्रीडितं चकादीदृशमन्यदपि विज्ञेयोरिति तासां मध्ये द्वयोर्द्वयोरित्याद्युक्तव्यापकत्वाभिप्रायेण श्रद्धा
न्वित इति अन्यथा रसानुदयेन परमभक्त्यसंपत्तः श्रद्धान्वितत्वादेव अनुनिरंतरं स्मरणात् एतद्भूतत्येव यद्वानु निष्ठितं अथ श्रवणा

नेतरं श्रवणान्वितत्वात् किंवा अनुक्तसमुच्चये स्मरेच्च प्रत्येकं सर्वेषां परमभक्तसाधनत्वात् तथापि श्रवणादित्रयस्यास्य यथोत्तरं
तत्र श्रेष्ठत्वं यद्वत्यधिकारित्वापेक्षा निरस्ता परं परमां प्रेमलक्षणां प्रतिक्षणं नूतनत्वेन लब्ध्वा हृद्रोगरूपं काममिति भगवद्विषयकः
114 कामविशेषोऽव्यवच्छिन्नः तस्य परमामृतत्वेन तद्वैपरीत्यात् धीरः सर्वार्थतत्त्ववेत्ता अपुनः कामादिस्तम्भितापि चेत्तोवा हृद्रोगादि
कमेतत्परमभक्तेरेवानुषंगिकं फलं तस्या एवमुख्यफलत्वात् तत्क्रीडाश्रवणादिनाप्येतत्स्यात् किंवक्तव्यं भौतिकनिंद्य
कामक्रीडावत् तस्यसाक्रीडेति प्रसंगानुसारेण तात्पर्यैकल्पं अतस्तेस्य तासां च सकामविशेषः प्रेमपरिपाकविलासवि
शेषरूप एव इतिलिखितमेव विवृतं च श्रीभागवतामृते अन्यत्रैव व्याख्यातं यद्वा धीरः विचारयन् सन्नित्यर्थः कामं यथेष्ट
स्वमाभुभक्तिं प्रतिलभ्य हृद्रोगमाध्यं श्रीकृष्णप्राप्त्यादिकृतमचिरेणापहिनोति तत्प्राप्तेरिति भावः अन्यत्समानं क्रीडा
तावद्दिंतं तत्प्रजडोऽयं येन त्यज्यते तस्य चैतत्स्वरूपस्य प्रीत्स्य भगवतोऽस्त्विदं इति श्रीदशमे त्रयस्त्रिंशः श्रीगोपीजनवल्लभाय नमः

चि
र्व
र